निश्वासतत्त्वसंहितायां नयसूत्रम्॥

ॐ नमः शिवाय।

देव्युवाच।
नवात्मके स्थिता तत्त्वा पाशाश्चैव महेश्वर।
छेदको योजकश्चैव मोक्षद((श्च प्रकीर्तितः))॥ 1:1॥

[6] ⊔ ((योगे तु)) ये पाशा कथं ज्ञेयाक्षरे ऽक्षरे।
एतन्मे [[(स)]]शयं ब्रूहि पाशदाहनिबन्धनम्॥ 1:2॥

ईश्वर उवाच।
अकारे सर्वतत्त्वानि संस्थितानि यशस्विनि।
बन्धते दहते चैव स एष परमेश्वरः॥ 1:3॥

अकारे त्वक्षरास्सर्वे स च सर्वेषु संस्थितः।
एवन्तं सर्व[[(वर्णानां पा)]]शदाहक्षमः स्मृतः॥ 1:4॥

दे[[(व्युवाच)]]।
[f. 29^{v}] ≪स्थूलरूपाः स्मृ≫ताः पाशा जीवस्सूक्ष्मस्स उच्यते।

1:1 नवात्मके स्थिता तत्त्वा] NW; नवात्मकस्थितास्तत्त्वाः K **1:1** मोक्षदश्च प्रकीर्तितः] W; मोक्षद --- N; मोक्षद ⊔ K **1:2** योगे तु ये पाशा] W; --- ये पाशा N; ⊔ ये पाशा K **1:2** पाशदाह°] NK; ¯सदाह° W **1:3** उवाच] K; उ NW **1:4** त्वक्षरास्] NW; तु क्षराः K **1:4** एवं तं सर्ववर्णानां पाशदाहक्षमं स्मृतम्] *conj.*; एवं ते सर्ववर्ण्ण--- शदाहक्षमस्मृतः N; एवं ते सर्ववर्णानां पासदाहक्षमः स्मृतः K; एवं ते सर्ववर्णा ⊔ सदाहक्षमस्मृतः W **1:5** °ताः पाशा] *em.*; °ता पाशा N; ⊔ K; °ता पाशा W

एकीभावगतावेतौ ताम्रे कालिकवद्यथा॥ 1:5॥

बध्यमानेषु पाशेषु कथञ्जीवो न बध्यते।
न दाहो दह्यमानेषु च्छेदो वा नास्ति च्छिद्यतः॥ 1:6॥

ईश्वर उवाच।
जलमध्ये [[य]]था मत्स्या बध्यन्ते जालयोगतः।
सलिलन्न [[((च))]] ब[[(द्धेत) तद्व]]ज्जीवो न बद्धते॥ 1:7॥

हेमवा --- [2] षाङ्कनकन्न च दह्यते।
दह्यमानेषु पाशेषु तद्वज्जीवो न दह्यते॥ 1:8॥

अयस्पिण्डो यथा ध्मातश्छिद्यमानस्तु खण्डशः।
न च छिनत्त्यसौ वह्निस्तद्वज्जीवो न च्छिद्यते॥ 1:9॥

आकाशं सर्वगं यद्वत्सर्वद्रव्येष्ववस्थितम्।
द्रव्येषु च्छिद्यमानेषु नाकाशं च्छेदमर्हति॥ 1:10॥

एवम्पाशगणास्सर्वे स्थूल((सूक्ष्मविभा))[3]गशः।
दह्यमानेषु पाशेषु दीक्षाकाले शिवाध्वरे॥ 1:11॥

न च च्छिद्यत्यसौ ह्यात्मा आकाशेव व्यवस्थितः।
बन्धदाहन्तु मन्त्रज्ञाः कुर्वन्ति शिवशासने॥ 1:12॥

जन्मबन्धञ्च पाशानां दग्ध्वा चैव शिवाग्निना।
तेजीभूता विशन्त्येते स्वतत्त्वम्पुनरेव हि॥ 1:13॥

1:5 कालिकवद्] W; कालकवद् N; कलिकवद् K **1:6** च्छिद्यतः] NK; छिद्यते W **1:7** उवाच] K; उ NW **1:7** बध्यन्ते] K; बन्ध्यन्ते NW **1:7** बद्धेत तद्वज्जीवो] K; ⌣ ⌣ ⌣ ⌣ज्जीवो N; ब ⁻तद्वज्जीवो W **1:8** हेमवा] K; हेम --- N; हेमकत्ता W **1:8** षाङ्] NK; षोन् W **1:8** दह्यते] NW; बध्यते K **1:9** अयस्पिण्डो] N; अयःपिण्डो K; अ ⁻म्पिण्डो W **1:9** ध्मातश्] *conj.*; धान्तश् N; ध्मान्तश् K; धातु W **1:9** छिनत्त्यसौ] NK^{pc}W; छिनात्त्यसौ K^{ac} **1:11** एवम्पाशगणास्सर्वे] NW; एवं न्यासगणः सर्व K **1:11** स्थूलसूक्ष्मविभागशः] *em.*; स्थूल --- [3] गशः N; स्थूल ␣गमः K; स्थूलसूक्ष्मविभागसः W **1:11** दीक्षाकाले] KW; दीक्षाकाल N **1:12** न च च्छिद्यत्यसौ ह्यात्मा] NW; न च च्छिद्यत्यसावात्मा K **1:12** आकाशेव व्यवस्थितः] NW; आकाशे च व्यवस्थितः K **1:13** जन्म बन्धञ्च पाशानां] NW; जन्मबन्धञ्च पासानां K **1:13** तेजीभूता] NW; तेजो भूता K^{ac}

सर्वपाशनिवृत्तास्तु कथिताः शिवशासने।
न मुच्यन्ते ऽन्यतन्त्रज्ञा ये पाशैर्न विमोचिताः॥ 1:14॥

देव्युवाच।
नवतत्त्वा अकारे तु कथन्देव व्यवस्थिताः।
स च एकः स्थितो व्यापी कथं वर्णास्तु संस्थिताः॥ 1:15॥

भगवङ्शर्व्व सर्वज्ञ सर्वनाथ जगत्पते।
अक्षरे अक्षरे ज्ञानं अकारे वद सुव्रत॥ 1:16॥

ईश्वर उवाच।
अकारस्त्वक्षरो ज्ञेय+:+ पञ्चाशत्तत्र सं[[((स्थितः))]] [5]।
[[((य))]]था तस्य शरीरे तु तथात्मनि निरीक्षयेत्॥ 1:17॥

शिखाग्रावस्थितो देव अनामा शक्तिसंयुतः।
शिखाग्रन्थौ च देवेशे सदाशिव इति स्मृतः॥ 1:18॥

ईश्वरस्तु शिरे नित्यं विद्या दक्षिणरेखिणी।
सव्यरेखा तु माया वै अधः कालः प्रलम्बितः।
अकुटीन्नियतीं विद्धि पुरुषञ्चार्द्धचन्द्रके॥ 1:19॥(?)

अध ऊर्ध्वङ्गता या तु प्रकृतिर्ध्वजरूपिणी।
एतानि नवतत्त्वानि अकारे संस्थितानि तु॥ 1:20॥

अकारस्सर्ववर्णानां शिरमाक्रम्य संस्थितः।(?)

1:14 °निवृत्तास्तु कथिताः] K; °निवृस्तु कथिता N (unmetrical); °निवृतस्तु कथिता W **1:14** न मुच्यन्ते ऽन्यतन्त्रज्ञा] *em.*; --- [4] न्यतन्त्रज्ञा N; ␣तन्त्रज्ञा K; न मुच्यन्ते ऽन्यतन्त्रज्ञ W **1:15** एकः] K; एक NW **1:16** भगवङ्शर्व्व] N; भगवन् शर्व K; भगवत् सर्व्व W **1:16** जगत्पते] K; गजत्पते NW **1:16** अक्षरे अक्षरे] NW; अक्षरे त्यक्षरे K **1:17** उवाच] K; उ NW **1:17** अकारस्त्वक्षरो ज्ञेयः] N; अकारस्थः क्षरो ज्ञेय K; अकारस्त्वक्षरो ज्ञेय W **1:17** पञ्चाशत्तत्र] *conj.*; पञ्चाशत्ततु N; पंचा(शत्त ¯) K; पंचा ¯ W **1:17** तस्य] NW; तस्यस्य K **1:18** शिखाग्रन्थौ च देवेशे] N; शिखाग्रस्थश्च K; शिखाग्रस्था च W **1:19** अधः कालः] *conj.*; अधः काल N^{pc}; अथ काल N^{ac}; अधः काल K; त्यधः कालः W **1:19** नियतीं] NW; नियतिं K **1:20** अध ऊर्ध्वङ्गता या तु] *em.*; अध ---[6] यास्तु N; अध ऊर्ध्वं ␣या तु K; अध ऊर्ध्वङ्गता यो ऽस्तु W **1:21** शिरमाक्रम्य] NW; शिर आक्रम्य K

†एवन्ते सर्ववर्ण्णास्तु सर्वतत्त्वसमन्वितः†॥ 1:21॥

दहते सर्वपाशानि दीक्षाकाले शिवाध्वरे।
पञ्चबिन्दूंस्ततः कृत्वा अकारं तु समालिखेत्॥ 1:22॥

--- [f.30^r] [[(ख्यं)]] तु ततो वि[[(द्व)]]ान्वर्ण्णैकैकन्निरीक्षयेत्।
यत्र वर्ण्णो न दृश्येत तत्रैकाशन्तु कारयेत्॥ 1:23॥(?)

शतार्धं तत्र दृश्येत अकारस्य शरीरतः।
स्वदेहे देशिकेन्द्रेण द्रष्टव्यानि पुनः पुनः॥ 1:24॥

अनामा कारणो देवः शिखाग्रावस्थितः परः।
---तपया(?) ((ज्ञे))या बि((न्दु))मूर्((र्द्धनि संस्थितः))॥ 1:25॥

((ललाट)) --- [2] ध्यतः।
घण्टिकायाम्महामाया कालः कण्ठे समाश्रितः॥ 1:26॥

हृदिस्था नियतिर्ज्ञेया पुरुषः पद्ममध्यतः।
प्रकृतिर्न्नाभिमध्यस्था ज्ञात्वा तत्त्वान्नवैव तु॥ 1:27॥

दीक्षकस्तु गुरुश्रेष्ठः शिवतत्त्वस्य पारगः।
अन्यथा न गुरुर्ज्ञेयो न दीक्षा न च मुक्तिदा॥ 1:28॥

शरीरस्थानि तत्त्वानि अज्ञात्वा न तु मुच्यते।
((अक्षराणि च)) ≪सर्वा≫[3] णि शरीरे तु यथा स्थिताः॥ 1:29॥

तानि सर्वाणि वक्ष्यामि प्रत्यक्षलिखितानि तु।
केचित्प्रत्यङ्गरूपाणि केचित्त्वङ्गाकृतिनि तु॥ 1:30॥

देहलीनौ करौ कृत्वा जङ्घौ चान्योन्यसंस्थितौ।

1:21 एवन्ते सर्ववर्ण्णास्तु] NW; एवे ते सर्ववर्णस्तु K **1:22** °बिन्दूंस्ततः] K; °बिन्दन्ततः N; °बिन्दु ततः W **1:22** अकारं तु समालिखेत्] W; अकार --- N; अकार ⊔ K **1:24** शतार्धं] N; शतार्ध्वं KW **1:24** देशिकेन्द्रेण] N; दैशिकेन्द्रेण K; देसिकेन्द्रेण W **1:26** समाश्रितः] K; समाशृतः N; समासृतः W **1:27** मध्यस्था] NW; मध्यस्थाज् K **1:28** गुरुश्रेष्ठः] *em.*; गुरुश्श्रेष्ठ NW; गुरुश्श्रेष्ठः K **1:28** ज्ञेयो] N; ज्ञेया KW **1:30** प्रत्यङ्गरूपाणि केचित्त्वङ्गाकृतीनि] *conj.*; प्रत्यक्षरूपाणि केचित्त्व(?)ङ्गकृतानि N; प्रत्यक्षरूपाणि केचि ⊔कृतानि KW **1:31** जङ्घौ] NW; जंघे K

प्रसृतं सर्वकायन्तु निष्कलाकारविग्रहम्॥ 1:31॥

धरण्यवस्थितञ्जानुं वामबाहुम्प्रलम्बितम्।
तिर्यगूर्द्धापसव्यन्तु मध्यग्रन्थ्युप[[रि (स्थितम्॥ 1:32॥

[4]स)]]कलं विग्रहं ह्येतदकारस्य विनिर्द्दिशेत्।
तिर्यग्वामकरङ्कृत्वा आकारन्तु विशिष्यते॥ 1:33॥

भ्रुवोः सन्धिं शिरः कृत्वा नेत्रतारौ तु बिन्दुकौ।
इकार एष विख्यातो नासावंशेन दीर्घिका॥ 1:34॥

उ ऊ श्रवणमध्यस्थौ ऋकारं बाहुकारितम्।
संहतौ च स्मृतौ जङ्घौ ऊर्द्धकायं प्रसारितम्॥ 1:35॥

दक्षिणं कारयेत्तिर्यग्बाहुं [5] चोपरिसंस्थितम्।
कराग्रं विन्यसेत्तत्र वामबाहुस्तु मध्यतः॥ 1:36॥

वामबाहुं ततोर्द्धन्तु कृत्वा री च भविष्यति।
चरणौ कारयेत् तिर्यगृकारस्सम्प्रदृश्यते॥ 1:37॥

लिकारन्तु रसास्वादि लीकारं घण्टिकासह।
ए ऐ दशनपङ्क्तिस्तु रेखा दन्तान्तरेषु च॥ 1:38॥

विदित्वा मुच्यते जन्तु अन्नपानस्य भक्षणे।
((न ¯गेत)) --- [6] पर ⌣ ⌣मो औकारे निरीक्षयेत्॥ 1:39॥

1:32 °गूर्द्धाप°] *em.*; °गूर्धाव° NW; °गूर्ध्वाव° K **1:32** °परि स्थितम्] K; °पा --- N; °परि ⊔ W **1:34** सन्धिं] *conj.*; सन्धि N; सन्धिः KW **1:34** कृत्वा] $N^{pc}W$; कृआ(?)त्वा N; ⊔ K **1:35** ऊर्द्धकायं] NW; ऊर्ध्वं कायं K **1:36** दक्षिणं कारयेत्तिर्यग्बाहुं चोपरिसंस्थितम्] *conj.*; दक्षिणकार --- [5] ⌣परिसंस्थितम् N; दक्षिणे कारयेत्तिर्य ⊔ण्ठोपरिसंस्थितः K; दक्षिणं कारयेत्तिर्यग्बाहं चोपरिसंस्थितम् W **1:36** कराग्रं] $NK^{pc}W$; करांग्रं K^{ac} **1:37** वामबाहुं ततोर्द्धन् तु] *em.*; वामबाहुस्ततोर्द्धन्तु NW; वामबाहुं ततोर्ध्वं तु K **1:37** री] $NK^{ac}W$; ऋ K^{pc} **1:37** कारयेत्] K; कारये NW **1:37** °गृकारस्सम्प्रदृश्यते] NW; °(गृऋ)कारः स प्रदृश्यते K^{pc}; गृकारः स प्रदृश्यते K^{ac} **1:38** लिकारन्तु रसास्वादि] NW; (लृ)कारं तु रसास्वादी K^{pc}; लिकारं तु रसास्वादी K^{ac} **1:38** लीकारं] NW; (लृलृ)कारं K^{pc}; लीकारं K^{ac} **1:39** °पानस्य] K; °पान्नस्य NW **1:39** पर ⌣ ⌣मो औकारे] N; ⊔यो औंकारे K; ⊔म्या योन्तोकारे W

मस्तकं बिन्दुरूपन्तु अकारं पूर्वचोदितम्।
वृषणेन्द्रियसंयोगादःकारो दृश्यते ध्रुवम्॥ 1:40॥

नाभ्योपरि समाख्यातं ककारम्पुरुषाकृतिम्।
शिरः शिरन्तु कृ[[((त्वा वै))]] ग्रीवास्कन्धे द्विरेखिणी॥ 1:41॥

उच्छ्रितं कारयेद्बाहुन्तिर्यग्रा(?)ा--- [[पा]]णिना।
[f. 30^{v}] --- [[((ए))]]ष विख्यातो शृतपाणिस्तु ग स्मृतः॥ 1:42॥(?)

ऊर्ध्वबाहुकरौ कृत्वा मुष्टिन्दक्षिणपाणिना।
घकारः शिरसा युक्तं ङकारं हीनबाहुना॥ 1:43॥

चकारं वक्त्रमाग्गें तु छकारं नासिके स्थितः।
ऊर्ध्वबाहुकरौ कृत्वा शि[[रो]]युक्तन्तु ज स्मृतः॥ 1:44॥

झकारं सम्प्रवक्ष्यामि यं विदित्वा शिवो भवेत्।
पिण्डितम्प्रसृतङ्कार्यं भुजं चैवोर्द्धदक्षिणे॥ 1:45॥

झकार एष विख्यातो ञकारञ्च निबोध मे।
भुजान्तलीनजठरङ्कृत्वा चोर्ध्वभुजं भवेत्॥ 1:46॥

द्विगुणीकृत्य तां बाहुं दक्षिणम्पाणि योजयेत्।
दक्षिणे श्रवणे योज्य वामबाहुन्निकुञ्चयेत्॥ 1:47॥

शिरस्याभिमुखो भूत्वा करौ तौ भोगसन्निभौ।
[3] ञकार विश्रुतो ह्येष सृते संहतजङ्घयोः॥ 1:48॥

टकार विद्धि विच्छिन्न यावद्गन्धतलं गतः।

1:40 °दःकारो] N^{pc}; °दकारो N^{ac}KW **1:41** नाभ्योपरि समाख्यातं ककारम्पुरुषाकृतिम्] NW; नाभ्युपरि समाख्यातः ककारः पुरुषाकृतिः K **1:42** °तिर्यग्राा] N; °तिर्यग्रा ⊔ K; °तिर्य ⊔ W **1:42** शृत°] NW; ≍त° K **1:42** ग] NW; गः K **1:43** ऊर्ध्व°] K; ऊर्द्ध° NW **1:44** ऊर्ध्व°] K; ऊर्द्ध° NW **1:44** ज] NK^{ac}W; जः K^{pc} **1:45** यं विदित्वा] W; --- [2] विदित्वा N; यद्विदित्वा K **1:45** कार्यं] K; कायं NW **1:45** भुजं चैवोर्द्धदक्षिणे] K; भुजञ्चैवोद्धदक्षिण N; भुजं चैवोर्द्धदक्षिण W^{pc}; भुंजं चैवोर्द्धदक्षिण W^{ac} **1:46** हुजान्तलीन°] NW; हुजान्तर्लीन° K **1:47** तां] NW; तं K **1:48** भोगसन्निभौ] W; भो --- N; ⊔ K **1:48** ञकारो] K; ञकार N; ऌकार W **1:48** सृते] N; सृत K; शृते W **1:49** विद्धि विच्छिन्न] *conj.*; विधि विच्छिन्न N; विधि विच्छिन्नो K; विधि विछिन्न W

ठकारस्सम्प्रदृश्येत ठकारो रन्ध्रविग्रहः॥ 1:49॥

तिर्यक्पिण्डीकृतौ जङ्घौ पार्श्वलीनौ तु तौ भुजौ।
डकार एष विख्यातो ढकारञ्च निबोध मे॥ 1:50॥

शिरः शिरस्तु कृत्वा वै वामबाहुन्निकुञ्चयेत्।
निकुच्य वर्तुलीकृत्य ढकारं ग्रीव[5]या विधिः॥ 1:51॥

अधश्चैवोरुसीमायां जङ्घौ मन्योन्यदर्शयेत्। (?)
अधोरुलीनविरला कृत्वा णश्च भविष्यति॥ 1:52॥

प्रसृते च तथा जङ्घे तकारं कटिना सह।
थकारो नाभिरुद्दिष्टा वलिरेखासमन्विता॥ 1:53॥

शिरः शिरन्तु विज्ञेयं भुजमध्ये निकुञ्चयेत्।
हस्तञ्चैव निकुञ्चेत दकारो दृश्यते बुधैः॥ 1:54॥

कण्ठं तु लच् [5] [[((ज))]]येद्धस्तं धकारं कायवर्जितम्।
मणिबन्धं शिरः कृत्वा दक्षिणस्य करस्य तु॥ 1:55॥

सङ्कुच्य चतुरोङ्गुल्यास्तथा मुष्टिन्तु कारयेत्।
अधोमुखः स्मृतो ऽङ्गुष्ठो नकारस्तु भविष्यति॥ 1:56॥

कर्ण्णलीनौ भुजौ कृत्वा ऊर्ध्वबाहौ तु कारयेत्।
मुष्टिन्दक्षिणपाणौ तु पकारन्तु भविष्यते॥ 1:57॥

अस्य रूपस्य सव्यन्तु बाहुं संकुंच्य [6]लक्षयेत्।

1:50 तिर्यक्पिण्डीकृतौ जङ्घौ] NW; नित्यं पिण्डीकृतौ जंघौ K **1:51** कृत्य] *em.*; कृत्य् ⌣ N; कृत्वा K; कृत्वा N **1:51** ढकारं ग्रीवया विधिः] W; --- [5] या विधिः N; ढ ⊔या विधिः K **1:52** जङ्घौ मन्योन्यदर्शयेत्] NW; जङ्घा अन्योन्यदर्शयेत् K **1:52** अधोरुलीनविरला कृत्वा] NW; अधोरुलीनविरलीकृत्वा K **1:53** कटिना] *conj.*; कथि(?)ना NW; कथिता K **1:53** थकारो नाभिरुद्दिष्टा वलिरेखासमन्विता] NW; थकारो नाभिरुद्दिष्टो वलिरेखासमन्वितः K **1:54** भुजमध्ये] NW; भुर्जमध्ये K **1:54** निकुञ्चेत] NW; निकुंचंतद् K **1:54** बुधैः] K; बु ⌣ N; बुधः W **1:55** कण्ठं तु] W; --- N; कद ⊔ W **1:55** धकारं कायवर्जितम्] NW; धकारः कायवर्जितः K **1:56** °तथा मुष्टिन्तु] *em.*; ° ⌣थाम्मुष्टिन्तु N; तथा ⊔थां मुष्टिं तु K; ¯हाम्मुष्टिन्तु W **1:56** अधोमुखः] Kअधोमुख° NW **1:57** °बाहौ] NW; °बाहुं K **1:57** भविष्यते] NW; भविष्यति K **1:58** संकुंच्य] W; लच् NK **1:58** लक्षयेत्] *em.*; --- NK; ल ¯ येत् W

फकारन्दिव्यविमलं बकारमुरसि स्थितम्॥ 1:58॥

दक्षि [[((ण))]]म्प्रक्षिपेद्धस्तं वामकक्षे विचक्षणः।
सङ्कुच्य वामकं बाहुम्भकारं कायवर्जितम्॥ 1:59॥

प्रसृतन्दक्षिणं बाहुं वामञ्चैवोर्ध्वकारितम्।
शिरः शिरन्तु कृत्वा वै मकारं कक्षया विधिः॥ 1:60॥(?)

सङ्कोचयित्वा तिर्यक्तु बाहुन्दक्षिण [[((मध्यतः))]] ।
((वाम)) [f.31^r] --- र्ध्वं वामन्तु कारयेत्॥ 1:61॥

कक्षाबाधे यकारस्तु रकारं साम्प्रतं शृणु।
जानुशिरस्तु पादोर्ध्वं रकारञ्चङ्घसंयुतम्॥ 1:62॥

देहलीनौ भुजौ कृत्वा उपविश्य च लक्षयेत्।
सङ्कुच्य वामजङ्घौ तु लकारन्दिव्यरूपिणम्॥ 1:63॥

मुष्कसूत्रशिरः कृत्वा वकारः पायुरुच्यते।
ः ः ध? व भि रे देवि वामबाहूर्ध्वकारिते॥ 1:64॥

---[2] ((ण))म्मध्ये योजयित्वा च सः स्मृतः।
पूर्वोक्तं हि शिरः कृत्वा दक्षिणम्भुजमुत्सृजेत्॥ 1:65॥

अभ्यन्तरे सव्यभुजङ्कृत्वा योज्येत मध्यतः।
निरीक्षयेद्बहिरूपं षकारस्य महात्मनः॥ 1:66॥

सकारं सम्प्रवक्ष्यामि दिव्यरूपेण संस्थितम्।
दक्षिणं योजयेद्धस्तं वामस्कन्धे विचक्षणः॥ 1:67॥

अधोलम्ब्य सव्यभुजं अर्द्ध --- ।

1:58 फकारन्दिव्यविमलं] N; फकारं ⊔विमलं K; फकार ⊔विमलं W **1:59** विचक्षणः] N^{pc}KW; विचंक्षणः N^{ac} **1:61** तिर्यक्तु] K; तिर्यन्तु NW **1:61** र्ध्वं] K; ध्व? N; र्द्ध W **1:62** कक्षाबाधे] NW; कक्षबोधे K **1:62** साम्प्रतं] *conj.*; सा ः तं N; (सा ⊔तं) K; म्य ँतं W **1:62** संयुतम्] NW; संयुतः K **1:64** ः ःध? व भि रे देवि वामबाहूर्ध्वकारिते] N; ⊔देवि वामबाहूर्ध्वकारिते K; ⊔ W **1:65** हि] NW; तु K **1:66** °बहिरूपं] *em.*; °बर्हिऊपं N; °बहिऊंपं K; °बहिऊपं W **1:68** °भुजं अर्द्ध] NW; °भु ⊔अर्द्ध K

[3]सकार एष विख्यातो हकारश्च निबोध मे॥ 1:68॥

लकारस्य तु यद्रूपं दक्षिणे तच्च कारयेत्।
हकारस्तु ततोद्दिष्टः क्षकारं साम्प्रतं शृणु॥ 1:69॥

एकरूपं चतुर्धा तु देहे दृश्यति स प्रभुः।
हिष्कारन्भ्रशिरन्तस्य रेखा या च मधोगता॥ 1:70॥

कट्या रेखा तु सम्प्राप्ता स्तनरेखेण क+:+ स्मृतः।
कटिरेखा च तिर्यञ्च नाभिरे (([[खा]] च मध्यतः)) ॥ 1:71॥

[4] पार्श्वे च या भवेद्रेखा क्षकारः प्रथमः स्मृतः।
हस्तसन्धिशिरः कृत्वा प्रसृता त्रीणि चाङ्गुलीम्॥ 1:72॥ (?)

मध्यमां योजये ऽङ्गुष्ठं तर्जनी वर्त्तुला ततः।
ऊर्ध्वन्तु मध्यमङ्कृत्वा क्षकारस्तु द्वितीयकः॥ 1:73॥

स एव दक्षिणे हस्ते क्षकारस्तु तृतीयकः।
ऊर्ध्वकायककारस्तु जंघौ संकुच्य पिण्डितौ॥ 1:74॥

कायोर्ध्वं कारयेत्तत्र क्षकारः स्पृष्टलक्षि[5]तः।
मातृकाविग्रहं ह्येतच्छरीरे यस्तु विन्दति॥ 1:75॥

अकारे च तथैवेह स संसाराद्विमुच्यते।
एतज्ज्ञानं परं श्रेष्ठं सर्वगुह्योत्तमोत्तमम्॥ 1:76॥

ज्ञात्वा मातृकसद्भावं गुरुर्भवति पाशहा।
मन्त्रास्तस्य वशास्सर्वे आज्ञां कुर्वन्ति चोदिताः॥ 1:77॥

1:69 लकारस्य तु] NW; लकारस्य K **1:69** ततोद्दिष्टः] N^{pc}K; ततोद्दिष्ट N^{ac}W **1:70** स] NK^{pc}W; सः K^{ac} **1:70** मधोगता] NW; अधोगता K **1:71** कट्या रेखा तु सम्प्राप्ता] NW; कट्टा रेखा तु सम्प्रोक्ता K **1:71** रेखेण] K; रेखेन NW **1:71** तिर्यञ्च] NW; तिर्यं चा K **1:72** प्रथमः] K; प्रथम NW **1:72** चाङ्गुलीम्] NW; चाङ्गुली K **1:73** मध्यमां] NW^{ac}; मध्यमा KW^{pc} **1:74** ऊर्ध्वकाय॰] NK^{ac}W; ऊर्ध्वः काय॰ K^{pc} **1:74** जंघौ] KW; जघौ N **1:75** कायोर्ध्वं कारयेत्तत्र] K; कायोर्द्धकायेत्तत्र N; कायार्ध्वकायैन्तत्र W **1:75** क्षकारः स्पृष्टलक्षितः] *em.*; क्ष ---तः N; क्षकार ⊔ K; क्षकार स्पृष्टलक्षितः W **1:76** अकारे] KW; अकांरे N **1:76** एतज्ज्ञानं] K; एतज्ज्ञान N; एतज्ञान W **1:76** परं] N; वरं KW

शिववज्रतले सो हि मोचकस्तु गुरुः स्मृतः।
न [[दानस्रा]]नतीर्थेन न जपध्यानहो [[((मभिः))]] ॥ 1:78॥

--- [6] ति परमं स्थानं यथा मातृकवेदने।
सर्वसिद्धान्तवादिन्यो कथयन्ति मुमु [[((क्ष))]] वः॥ 1:79॥

मुक्ता मातृकविज्ञानन्तुषा क्षोदन्ति मोहिताः।(?)
एवन्ते अक्षरास्सर्वे तत्त्वसम्पूर्णसंस्थिताः॥ 1:80॥

दहन्ते सर्वपाशानि मोक्षदानि भवन्ति च।
अजप्तः सिध्यते मन्त्रो अहुतस्तु फलप्रदः॥ 1:81॥

यथा विहाय सफलं अध्या((तो मातृ)) --- [f.31^{v}] ।
≪देव्युवा≫((च))।
कथं बद्धन्ति ते पाशास्तत्त्वरूपेण संस्थिताः॥ 1:82॥

पाशधर्मं वद शीघ्रमत्र मे संशयो महान्।
ईश्वर उवाच।
अनुग्रहतिरोभावौ द्वौ पाशौ तु सदाशिवे॥ 1:83॥

नास्तिक्यञ्च तिरोभावः शुष्कतर्क्कावलम्बनम्।
तर्क्कभावसमायुक्त अयुक्तङ्कुरुते बहुम्॥ 1:84॥

---

83 अनुग्रहतिरोभावौ द्वौ पाशौ तु सदाशिवे Quoted without attribution ad *Paramokṣa-nirāsakārikā* 4ab by Rāmakaṇṭha. Also quoted, without attribution, ad *Mataṅgavidyā-pāda* 3:1–3 and by Tryambakaśambhu ad *Kiraṇa* 1.13 (IFP T. 1102, p.13).

1:78 गुरुः स्मृतः] K; गुरु स्मृतः N; गुरु स्मृतं W **1:79** ति] W; --- N; ते K **1:79** °वादिन्यो] NW; °वादिभ्यो K **1:80** मुक्ता मातृकविज्ञानन्तुषा क्षोदन्ति मोहिताः] N; मुक्ता मातृकविज्ञानं तपा क्षेदन्ति मोहिताः K; मुक्का मातृकविज्ञानन्तुषा क्षोदन्ति मोहिताः W **1:80** तत्त्व° ?] N; तत्व° KN **1:81** अजप्तः] K; अज्ञप्त N; अजप् ⏑ W **1:81** मन्त्रो] NK^{ac}W; मन्त्रः K^{pc} **1:82** यथा विहाय] K; ⏑ य ⏑ वहाय N; ⁻ य ⁻ वहाय W **1:82** बद्धन्ति] *em.*; बध्यन्ति NKW **1:83** °धर्मं वद शीघ्रमत्र मे संशयो महान्] *conj.*; °धर्म्म वद शीघ्र ⏑⏑ मे संशयः ⏑हान् N; °धर्मं वद शीघ्रमेतन्मे संशयो महान् K; °धर्म वद शीघ्र ⁻मे संसयओ महान् W **1:83** अनुग्रह-तिरोभावौ] *em.*; अनुग्रहतिरोभाव NW; अ ⏑ग्रहतिरोभावौ K **1:84** बहुम्] NW; बहु K

अयुक्तकारी पुरुषो नरकेषु प्रपच्यते।
((तिर्यग्यो))--- [2] [[(पशु)यो]]निषु जायते॥ 1:85॥

जन्मे जन्मे विमूढात्मा तिरोभावगतिं व्रजेत्।
तिरोभावश्च कथितो ऽनुग्रहञ्च निबोध मे॥ 1:86॥

श्रद्दधानो धर्म्मवतः शुभकर्म्मसु चेष्टते।
विद्यान्वेषी स्वर्ग्गगतिः स्वर्ग्गलोके तु क्रीडते॥ 1:87॥

तत्रैव तु परिभ्रष्टो जायते चोत्तमे कुले।
शिवशक्तिनिपातेन दीक्षा [[((ज्ञा))]]नम्प्रयच्छति॥ 1:88॥

सो ऽनुग्रहः स्मृतो [[(ह्येवं [3] दा)]]ता चैव सदाशिवः।
ईश्वरस्सृष्टिपाशेन योजयेत्सर्वजन्तवान्॥ 1:89॥

प्रेरकः पुण्यपापाभ्यां सर्वस्य हृदि संस्थितः।
व्रतम्पाशुपतम्प्रोक्तमनुग्रहनिमित्तये॥ 1:90॥

ददाति च परान्निष्ठाञ्ज्ञानमोक्षाम्प्रयच्छति।
अक्षयं हि गणत्वञ्च भूर्ल्लोके लिङ्गरूपिणः॥ 1:91॥

संस्थित ईश्वरो भूत्वा ददाति च हरेति च।
शास्त्रार्थमन्यथा[[(सत्य)म]]न्यथा यः प्रभाषते॥ 1:92॥

†अन्यथाभाषणे विद्या वदन्ते तर्कवादिनः†।
मातापितृसुतान्दारां गृहवाहन यद्वसु(?)॥ 1:93॥

अतिस्नेहसमापन्नो मायापाशस्तदुच्छिदः।

1:85 अयुक्तकारी पुरुषो नरकेषु प्रपच्यते] *conj.*; अयुक्तका --- षु प्र(?) पच्यते N; अयुक्त(कारी पुरुषो नरकेषु प्रपच्यते K; अयुक्तकारि ¯वि ⊔ग्रपच्यते W **1:85** पशु-योनिषु] K; --- ≍निषु N; ⊔यानिषु W **1:86** जन्मे जन्मे] NW; जन्म जन्म K **1:87** °लोके तु] NW; °लोकेषु K **1:89** °नुग्रहः] K; °नुग्रह NW **1:89** ह्येवं दाता] *conj.*; (ह्येव दा)ता K; ---ता N; ⊔ ता W **1:90** °पापाभ्यां] N; °पापानां K; °पापा ≍ W **1:91** °ज्ञानमोक्षाम्°] NW; ज्ञानं मोक्षां K **1:92** हरेति] NW; हरति K (unmetrical) **1:92** °सत्यमन्यथा] K; ≍ --- [4] ≍न्यथा N; सन्तमन्यथा W **1:93** अन्यथाभाषणे] K; अन्यर् ≍भाषणे N; अन्य ⊔षणे W **1:93** तर्कवादिनः] K; तर्क्कवादिनाम् NW **1:93** गृहवाहन यद्वसु] N; गृहवाहन ⊔ K; गृहवाहनय ⊔ W

नास्ति धर्म्मो न च स्वर्ग्ग अधर्म्मनिरयौ न च॥ 1:94॥

दुःखिताश्च मृयन्त्येते ज्ञानमोक्षन्न विद्यते।
मायापाशस्समाख्यातं कालपाशञ्च मे शृणु॥ 1:95॥

कालो गणनसंख्याया आयुश्चैव प्रकुर्वते।
नियतिश्च ददत्यायुः कौमारं यौवनं जरा॥ 1:96॥

व्याधिमृत्युञ्च कालेन स वै संहरते प्रजाम्।
शुभं वाप्यशुभं यच्च अन्यजन्मार्जितम्भवेत्॥ 1:97॥

तस्य भोगप्रदा ह्येषा नियतिर्योजयेद्बलात्।
पुरुषस्त्रिगुणैर्बद्धो बुद्ध्या वैकारिकेण च॥ 1:98॥

तन्मात्रेन्द्रियबन्धेन दृढं भूतैस्तु वेष्टितः॥ 1:99॥

[6][[दे]]हपाशाः स्मृता ह्येते गणपाशानि मे शृणु।
लब्धानुज्ञो [[((न))]] सङ्क्रामे विद्येशस्तेन बध्यते॥ 1:100॥

मूल्यङ्कृत्वा वदेज्ज्ञानं षण्मुखस्तेन बध्यते।
अलब्धानुज्ञो [[व]]दे ज्ञानं ददाति च अदीक्षिते॥ 1:101॥

सिद्धिं गणपतिर्हन्याच्छिद्रन्दृष्ट्वा तु साधके।
परिवर्त्तयति यस्तन्त्रं पशुज्ञानेन मोहितः॥ 1:102॥

---

98 Cf. *Svacchanda* 11:103: बुद्धिस्त्रिगुणबन्धेन बुद्ध्या वैकारिकेण तु। तन्मात्रेन्द्रियबन्धेन दृढं भूतैश्च वेष्टितः।

1:94 °निरयौ] K; निरयो NW **1:95** दुःखिताश्च] NW; दुःखिताञ्च K **1:95** °ख्यातं] NW; °ख्यातः K **1:96** कालो गणनसंख्याया] K; काल --- [5] संख्याया N; काला ⁻णनसं ≍या W **1:96** आयुश्चैव] NW; आयुंश्चैव K **1:96** नियतिश्च ददात्यायुः] *conj.*; नियत्यञ्च ददत्यायुः N; नियतं च ददत्याशुः K; नियत्यं न्च ददन्त्यायुः W **1:97** व्याधिमृत्युञ्च] N; व्याधिर्मृत्युञ्च? K; व्याधिमभ्युं च W **1:97** संहरते प्रजाम्] NW; संहते प्रजा K **1:98** भोगप्रदा] NW; ≍गप्रदा W **1:98** त्रिगुणैर्बद्धो] K; तृगुणैर्द्बद्धो N; तृगुणैर्द्बद्धौ W **1:98** वैकारिकेण] K; वैकारिकेन NW **1:99** °बन्धेन] NW; बद्धेन K **1:99** दृढं भूतैस्तु वेष्टितः] *em.* (cf. Svacchanda 11:103d); दृढ --- N; दृढभूस्तैस्तु वेष्टि ⊔ K; दृढभूतैस्तु वेष्टिं W **1:101** वदेज्ज्ञानं] NW; वदे ऽज्ञानं K

नन्दिर्बध्नाति वै शीघ्रं [[चण्डीश + : + स]][f. 32r]मयाष्टसु।
यो निन्दति शिवम्देवन्तद्भक्तन्देशिकन्तथा॥ 1:103॥

निर्[[((मा))]]ल्यभक्षणे वापि बलिदाने पशोरपि।
आदत्ते चार्तविस्पृष्टं शास्त्रनिन्दां करोति च॥ 1:104॥

लिङ्गच्छायाविलङ्घी च चण्डीशो बन्धते भृशम्।
प्रतिज्ञाव्रतमारूढो पुनस्त्यत्क्वा शिवं व्रतम्॥ 1:105॥

अन्यत्तन्त्रव्रतङ्गृह्णेद्देवि तेन निबन्धति।
शिवतन्त्रमधीत्वा तु शिव[[यज्ञं (प्रकु)]][2]र्व्रते॥ 1:106॥

यजते वैदिकैर्यज्ञैः शिवभक्तांश्च निन्दते।
विप्रांश्चैवान्यलिङ्गस्थां पूजयेत्स्तुनतेति च॥ 1:107॥

हाठकुष्माण्डरुद्रस्तु तं वै बध्नाति दुर्म्मतिम्।
गणपाशानि बध्नन्ति दीक्षितन्तु तथा दृढम्॥ 1:108॥

कामक्रोधश्च लोभश्च जन्ममृत्युस्तथैव च।
जरा व्याधिश्च शोकश्च क्षुत्तृष्णा च मदस्तथा॥ 1:109॥

विषादश्च भयश्चैव महामोहश्च दारुणं।
दम्भो रागश्च मोहश्च [[मद]]मात्सर्यमेव च॥ 1:110॥

उन्मादश्चैव शोषश्च पैशुन्यं क्रुद्धता [[((त))था]]।
धर्म्माधर्म्मश्च हिन्सा च अस्वतन्त्रा सदा तनुः॥ 1:111॥

1:103 शीघ्रं चण्डीशः स°] K; --- N; शीघ्रं चण्डीसः स° W **1:104** बलिदाने] *conj.*; बलिदान° NKW **1:104** आदत्ते] *conj.*; अदत्ते NKW **1:105** चण्डीशो] NW; चण्डीशै K **1:105** °मारूढो] NW; °मारूढः K **1:105** शिवं] NW; शिव° K **1:106** गृह्णेद्] NW; गृह्णन् K **1:106** देवि] K; देवि NW*CHECK*! **1:106** निबन्धति] NW; निबध्यति K **1:106** शिवयज्ञं प्रकु°] K; शि ≍ --- N; शिवयज्ञाअ ⁻ W **1:107** °तुनतेति] NW; °तुवतेति K **1:108** तं वै बध्नाति दुर्म्मतिम्] *conj.*; त वै बध्नाति दुर्म्मतिम् N; तवैव प्रातिदुर्मतिः K; तवैव प्रातिदुर्म्मतिं W **1:108** दीक्षितन्तु] NW; दीक्षितस्तु K **1:108** दृढम्] NW; दृढः K **1:109** कामक्रोध°] NW; कामः क्रोध° K **1:109** क्षुत्तृष्णा] NW; क्षुट्तृष्णा K **1:110** भयश्चैव] NW; भयश्चैव K **1:110** महामोहश्च दारुणं] *em.*; म --- [3] णं N; महामोहश्च (दारु)णः K; महामोहसु ␣णं W **1:111** धर्म्माधर्म्मश्च] NW; धर्माधर्मस्व K **1:111** अस्वतन्त्रा सदा तनुः] *conj.*; अस्वतन्त्रसदातनुः NW; अस्वतंत्र सदाञ्च वै K

एभिः पाशैस्सुबद्धाश्च न मुच्यन्ते ऽन्यशासनात्।
पशुतन्त्रप्रणेतारैर्न्न दृष्टम्पशुबन्धनम्।
तस्मात्ते तु न मुच्यन्ते पशुज्ञानरता नराः॥ 1:112॥

॥ ⊗॥ इति निश्वासतत्त्वसं((हितायां)) ≪नय≫[4]सूत्रे पाशप्रकरणं प्रथमः पटलः

श्रो अल ॥ ⊗॥

देव्युवाच।
नामन्तन्वी च योगञ्च लक्षा प्रोक्ता महेश्वर।
क्रमोत्पत्तिश्च तत्त्वानां रूपकं चैव मे वद॥ 2:1॥

ईश्वर उ।
सूक्ष्मं सर्वगतन्देवं कारणं जगतः पतिम्।
अनिर्देश्यमनौपम्यमक्षरं परमेश्वरम्॥ 2:2॥

निष्प्रपञ्चनिरालम्बं वाग्विशुद्धमनक्षरम्।
व्योम--- [5] [[मिता]]भासम्प्रपञ्चातीतगोचरम्॥ 2:3॥

शक्तिमूर्ध्निस्थितं शान्तं योगगम्यं सनातनम्।
सर्वज्ञं सर्वकर्त्तारं सर्वतोक्षिशिरोमुखम्॥ 2:4॥

अनामानामकोटीभिस्स शिवः परिगीयते।
तेन सर्वमिदं विश्वं कारितन्न च कामतः॥ 2:5॥

देव्युवाच।
अकामस्य क्रिया नास्ति निष्कामः सृजते कथम्।

---

6 This passage, from 2:6–9, has been adapted to create *Svacchandatantra* 11:316–19, for which see Appendix II.

1:112 निश्वासतत्त्वसं°] NW; निश्वासमुखतत्वसं° K **1:112** श्रो अल] NW; श्रो ⊔ K **2:1** नामन्तन्वी] N; नाम तत्त्वाश्च K; नाम् तत्वी W **2:3** निष्प्रपञ्चनिरालम्बं] NW; निष्प्रपञ्चं निरालम्बं K **2:3** मिता°] K; --- N; नि ¯ W **2:4** शक्तिमूर्ध्नि] K; शक्तिमूध्नि N; शक्तिमूर्ब्नि W **2:4** सर्वकर्तारं] K; सर्वकार्त्तारं NW **2:5** अनामा°] NW; अनाम° K **2:5** कारितन्न च] NW; कारितं सर्व° K

एतत्प्रश्नवरं गु[[ह्यं कथयस्व]] [6] प्रसादतः॥ 2:6॥

ईश्वर उवाच।
आदित्यस्य मणिर्यद्वत्तापितो रविरश्मिभिः।
वह्निस्सञ्जायते तत्र न रवे तत्र कामता॥ 2:7॥

मणेरपि न कामित्वन्तद्वद्देवस्य चेष्टितम्।
आदित्यवच्छिवो ज्ञेयः शक्तिर्म्मणिरिव स्थिता॥ 2:8॥

ऋतुकालमनुप्राप्य कालस्तत्र नियोज[[येत्]]।
शिवतेजेन संयुक्ता [[श]]≪क्तेर्जायति बिन्दुकः≫॥ 2:9॥

[f.32^{v}] कलाश्चेश्वर विद्या च माया कालस्तथैव च।
नियतिः पुरुषश्चैव प्रकृतिश्च समासतः॥ 2:10॥

प्रकृतेर्द्धिषणा जाता भूतादिर्धिषणादपि।
भूतादेश्शब्दतन्मात्रं स्पर्शतन्मात्रसंयुतम्॥ 2:11॥

रूपतन्मात्रमेवाहु रसतन्मात्रकन्ततः।
गन्धतन्मात्रसंयुक्तं जायते च? ≃ चै के? ≃ ।
--- (?) ॥ 2:12॥

[2] [[((बु))]]द्धीन्द्रियाणि पञ्चैव विद्धि कर्म्मेन्द्रियाणि च।
वाक्पाणिपादपायुश्च उपस्थेति च पञ्चमम्॥ 2:13॥

मनश्चैकादशो ज्ञेयमुभयोरपि धावति।
अहंकारोद्भवा ह्येते षोडशैते प्रकीर्त्तिताः॥ 2:14॥

शब्दतन्मात्रसम्भूतमाकाशं शब्दलक्षणम्।

2:6 गुह्यं कथयस्व] K; गु? --- ≃ N; गुह्यं ⊔यश्च W **2:7** उवाच] K; उ NW **2:9** ऋतु°] K; रितु° NW **2:9** शिवतेजेन] N; शिवस्तेजेन W; शिवविज्ञ° K **2:9** शक्तेर्जायति बिन्दुकः] *conj. Kafle* (cf. USū 1:6ab); --- NW; श ⊔ K **2:10** कलाश्चेश्वर विद्या] *conj.*; --- ≃ श्चश्वरविद्या N; दाश्च स्वरविद्या च K; न्दोश्च श्वरविद्या W **2:10** समासतः] KW; समासंतः N **2:11** °द्धिषणा] NW; °द्वि(द्वे)षणा K **2:11** भूतादिर्धि°] *conj.*; भूतादिद्धि° N; भूतादिद्वि(द्वे) K; भूतादिद्वि°W **2:12** संयुक्तं] K; संयुक्त NW **2:12** जायते च] *conj.*; ≃ यते च N; यते च K; ⊔ यते W **2:14** °चैकादशो] *em.*; °चैकांदशो NW; °चैकादश K

स्पर्शतन्मात्रसम्भूतं वायुर्द्विगुणलक्षणम्॥ 2:15॥

रूपतन्मात्रतो ज्ञेयन्तेज[[स्]]त्रिगुणलक्ष[3]णम्।
रसतन्मात्रसम्भूता आपश्चैव चतुर्गुणाः॥ 2:16॥

गन्धतन्मात्रसम्भूता पृथ्वी पञ्च[[((गु))]]णान्विता।
तत्त्वैरेतैर्जगत्सर्वज्ञातं स्थावरजङ्गमम्॥ 2:17॥

भुवनानि विचित्राणि शतशो ऽथ सहस्रशः।
तत्त्वाभ्यन्तरसंस्थानि शास्त्राणि विविधानि च॥ 2:18॥

विज्ञानं कुहकं शिल्पं सिद्धिसंबोधलक्षणम्।
प्रक्रिया शिवदीक्षा च तत्त्वैरे[[((तै))स्तु]] [4] लभ्यते॥ 2:19॥

सर्वं तत्त्वेषु बोद्धव्यं सर्वं तत्त्वेषु दृश्यते।
न च वस्त्वन्तरङ्किंचिद्यस्तत्त्वाद्व्यतिरिच्यते॥ 2:20॥

देव्युवाच।
तत्त्वसृष्टिस्त्वया प्रोक्ता जगत्सम्भवकारिणी।
तत्त्वविज्ञानमाख्याहि सिद्धिश्चैव कथम्भवेत्॥ 2:21॥

प्रक्रिया च कथन्तेषु दीक्षा निर्वाणगामिनी।
पुनर्विस्तरशो ब्रूहि प्रश्नं गुह्यतरं विभो॥ 2:22॥

ईश्वर उवाच।
पृथिव्या[[((दि))]] ≪शि≫[5]वान्तञ्च प्रवक्ष्यामि निबोधतः।
पृथ्वी कठिनरूपेण शृणु देहे यथा स्थिता॥ 2:23॥

मांसे चैव तथास्थिभ्यो स्नायुलोमनखेषु च।

---

21 This passage, from 2:21–102, has been adapted to create *Svacchandatantra* 12:1c–82, for which see Appendix II.

2:16 त्रिगुणलक्षणम्] *conj.*; तृ --- णम् N; तृ ⊔ K; तृगुण ⊔ णम् W **2:20** सर्वं तत्त्वेषु बोद्धव्यं] NW; सर्ववंतत्त्वे प्रबोद्धव्यं K **2:20** किंचिद्यस्तत्त्वाद्व्यतिरिच्यते] *em.*; किचिद्यस्त्वत्वाद्व्यतिरिच्यते N; किंचिद्यस्तत्वाद्व्यतिरिच्यते K; किचियस्त्वत्वोद्व्यतिष्यते W **2:21** °सृष्टिस्त्वया] K; °सृष्टि त्वया N; °शृष्टि त्वया **2:21** °कारिणी] K; °कारिणि NW **2:21** °श्चैव] K; श्चैव NW **2:23** उवाच] K; उ NW **2:24** मांसे] K; मान्से NW

अन्त्रे मज्जे च विज्ञेया पृथ्वी पञ्चगुणोत्कटा॥ 2:24॥

कफासृन्मूत्रमेदेषु रसस्वेदवसासु च।
शुक्रे च सङ्ग्रहे चैव स्थिता ह्यापश्चतुर्गुणाः॥ 2:25॥

पचने दर्शने चैव पीतोष्मे तेज संस्थितम्।
[[तेजी(शश्च)]] [6] समाख्यातो स च ज्ञेयस्त्रिलक्षणः॥ 2:26॥

वायूच्छ्वासे निरुच्छ्वासे चेष्टने स्पर्शनेति च।
मूत्रोच्चारविसर्गे च अन्नपानप्रवेशने॥ 2:27॥

वायुरेभिः स्थितो देहे विज्ञेयस्तु द्विलक्षणः।
एकलक्षणमाकाशन्तद्धि वक्ष्यामि तत्त्वतः॥ 2:28॥

सुशिरात्मकन्तु विज्ञेयन्नवधा च्छिद्रलक्षणम्।
शब्दात्मकगुणो ह्येष तेनासौ ह्येकलक्षणः॥ 2:29॥

[f.33^r] वागेन्द्रियं वदेद्वाणीं सा च वाणी चतुर्विधा।
संस्कृता प्राकृता चैव अपभ्रंशानुनासिका॥ 2:30॥

उक्ता वागेन्द्रिये धर्म्मा हस्तेन्द्रियमतः शृणु।
छेदनं भेदनं दानं वेधनं शिल्पकारितम्॥ 2:31॥

ग्रहणं विजयञ्चैव सर्वं हस्तेन्द्रिये स्थितम्।
समनिम्नोन्नतानीह कण्टलोष्टुकवालुका॥ 2:32॥

कर्द्दमञ्जलदुर्ग्गाणि [[पर्वता]]ट्टालर≪थ्यकाः≫।

2:25 °सृन्मूत्रमेदेषु रसस्वेदवसासु च] *conj.*; °सृक्मूत्रमेदेषु रसास्वादिवसेषु च NK; °शृक्मूत्रमेदेषु रसास्वादिवसेषु च W **2:25** ह्याप°] NW; आप° K **2:26** तेज संस्थितम्] *conj.*; तेजस्संस्थि≍ N (unmetrical); तेज संस्थितः K; तेज सांस्थितम् W **2:26** तेजीशश्च] K; --- N; तेज ⊔ W **2:28** द्विलक्षणः] NW; विलक्षणः K **2:28** तद्धि] N; तद्वि KW **2:29** ह्येकलक्षणः] K; ह्येकल --- N; ह्यकलक्षणः W **2:30** वागेन्द्रियं] W; ---गेन्द्रियं N; वागीन्द्रियं K **2:31** उक्ता वागेन्द्रिये धर्म्मा] NW; उक्तो वागीन्द्रिये धर्मो K **2:31** दानं वेधनं] *conj.*; दानं ≍ धनं N; दानं ⊔धनं K; दा ¯ ¯ो ध ¯ W **2:32** हस्तेन्द्रिये] NW; हस्तेन्द्रिय° K **2:32** कण्टलोष्टुक°] *conj.*; कण्टलोष्टुक° N; कणलोष्टक° K; कण्ठलोष्टक° W **2:33** पर्वताट्टालरथ्यकाः] *conj.* (cf. *Svacchandatantra* 12:12b); --- ट्टा(?)लर --- N; पर्वता ⊔ ल ⊔ रिष्यते K; पवता ¯लरण्यम W

≪पादे≫[2] न्द्रिये गुणाः प्रोक्ता देशान्तरगमागमे॥ 2:33॥

उत्सर्गे छर्दिते चैव पायुश्चेष्टति सर्वतः।
गम्यागम्ये प्रवर्त्तेत उपस्थो नन्दकारकः॥ 2:34॥

एते कर्म्माः प्रवर्तन्ते तेन कर्म्मेन्द्रियाः स्मृताः।
बुद्धीन्द्रियास्तथा पञ्च वर्त्तन्ते बुद्धियोगतः॥ 2:35॥

श्रोत्रे श्रवणधर्म्मित्वं याति शब्दानि गृह्णते।
तानि वक्ष्यामि तत्त्वेन यथावदनु[[पू(र्वशः)]]॥ 2:36॥

[3] षड्जं च ऋषभश्चैव गान्धारम्मध्यमन्तथा।
पञ्चमन्धैवतं षष्ठन्निषादश्चैव सप्तमः॥ 2:37॥

सप्त स्वरास्त्रयो ग्रामा एकविंशति मूर्च्छनाः।
तानान्येकूनपञ्चाश इत्येतत्स्वरलक्षणम्॥ 2:38॥

सूक्ष्माश्शब्दाः स्मृता ह्येते सर्वजन्तुष्ववस्थिताः।
स्थूलान्यपि प्रवक्ष्यामि यथावत्तन्निबोधत॥ 2:39॥

भेरीशंखमृदङ्[[((गं च))]] ≪पटहं≫[4] [[प]]णवन्तथा।
मर्द्दलन्दर्द्दुरं वेणुं गोमुखतालमेव च॥ 2:40॥

तन्त्रीवाद्यविचित्राणि करवाद्यानि यानि च।
मुखवाद्यानि रम्याणि काष्ठायुक्तानि चैव हि॥ 2:41॥

संस्कृतं प्राकृतं चैव अपभ्रंशमनुनासिकम्।
सप्त स्वरप्रतिष्ठानि व्याक्ताव्यक्तानि यानि च॥ 2:42॥

2:33 न्द्रिये] NW; न्द्रिय° K **2:33** देशान्तरगमागमे] W; देंशान्तरगमागमे N; देशान्तरसमागमे K **2:34** छर्दिते] *conj.*; स्पर्द्धिते NK; स्पर्द्धिते W **2:34** गम्यागम्ये] *conj.*; गम्यागम्य NW; गम्यागम्यं K **2:34** उपस्थो नन्दकारकः] NW; उपस्थानन्दकारकः K **2:36** पूर्वशः] K; --- N; पूर्व ¯ W **2:37** °धैवतं] N; चैव तं KW **2:37** निषादश्चैव सप्तमः] N^{pc}; निषादश्चैव सप्तम ⌣ N^{ac}W; निषादं चैव सप्तमम् K **2:38** मूर्च्छनाः] *conj.*; मूर्च्छना NKW **2:38** तानान्येकूनपञ्चाश] *conj.*; तानान्येकुनपञ्चाश NW; तानाभ्यक्तेनपञ्चाश K **2:39** °बोधत] *em.*; °बोधतः NKW **2:40** पटहं] *conj. Kafle*; --- NKW **2:40** पणवन्तथा] W; ⌣णवन्तथा N; पणवस्तथा K **2:40** वेणुं] NW; वेणं K **2:41** काष्ठा°] NW; काष्ठ° K **2:42** प्राकृतं चैव] KW; प्राकृञ्चैव N

उक्तादनुक्तशब्दानि गृह्णाति श्रवणेन्द्रिय [[((:))]] ।
शब्दस्य विषयो ह्येष पुरुषो येन बुध्यते॥ 2 : 43॥

मृदुश्च कठिनश्चैव कर्क्कशं शीतलन्तथा ।
उष्णञ्च पिच्छिलं लोष्टुकण्टकं वालुकर्द्दमम्॥ 2 : 44॥

शरकुन्तासिघातानि ताडनञ्छेदनञ्च यत् ।
एतान्यन्यानि जातानि स्पर्शेन तु त्वगिन्द्रियाः॥ 2 : 45॥

स्पर्शस्य विषयो ह्येष येनात्मा तु निबध्यते ।
चक्षुषश्चैव कर्मा ((णि कथ्य ≪माना≫नि)) मे शृणु॥ 2 : 46॥

सितं रक्तञ्च पीतञ्च कृष्णं हरितपाण्डुरम् ।
कपिलं पिङ्गलं वभ्रुरन्यान्यपि विशेषतः॥ 2 : 47॥

नरनारीपशुमृगं ज्योति स्थावरजङ्गमम् ।
रूपाकृतिविभक्तानि चक्षुः पश्यति सर्वतः॥ 2 : 48॥

रूपस्य विषयो ह्येष येन बध्यति पुद्गलं ।
मधु≪राम्लरसं चैव लवणं कटु तिक्तकम्≫॥ 2 : 49॥ [f. 33^{v}]

≪कषाय≫ [[((मि))]]श्रं स्वादुञ्च जिह्वा वेदयते रसम् ।
रसस्य विषयो ह्येष येन बध्यति स पुमान्॥ 2 : 50॥

सुरभीणि सुगन्धानि दुर्ग्गन्धाञ्च -म् - अशोभनाः ।
उभाभ्यां जिघ्रते नासा विषयो गन्धलक्षणः॥ 2 : 51॥

येनासौ बध्यते क्षेत्री अहङ्कारेण मोहितः ।
संकल्पाञ्च विकल्पाञ्च --- षु धावति॥ 2 : 52॥

2:43 शब्दस्य विषयो ह्येष] *conj.*; शब्द ⊔विषयो ह्येष W; --- ≍ [5] षयो ह्येष N; ⊔ विषयो ह्येषः K **2:43** बुध्यते] *conj.*; बध्यते NKW **2:44** लोष्टुकण्टकं] N; लोष्टुं कण्टकं K; लोष्टकण्टकं W **2:46** कर्माणि कथ्यमानानि मे] *conj.*; ⌈ --- [6] मे N; कर्माणि क ⊔मे K; कर्माणि कथ्य ⊔नि मे W **2:47** कपिलं] KW; कपिंलं N **2:48** ज्योति] NW; ज्योतिः K **2:49** पुद्गलं] *conj.*; ≍द्गलं N; पुंगलः K; पुंगलं W **2:49** मधुराम्लरसं चैव लवणं कटु तिक्तकम्] *conj.*; मध --- N; --- KW **2:50** स्वादुञ्च] *em.*; स्वादुश्च NKW **2:51** सुगन्धानि] NW; च गन्धानि K **2:51** म्-अशोभनाः] *conj.*; मशोभना NW; अशोभना K **2:52** ---षु] N; ⊔ प्र° K; ⊔ W

≪मन≫[2]स्तु कथितं ह्येतद्धर्म्माधर्म्मनिबन्धकं।
अनि≪वारितसम्मोही अजयः≫ ((सर्वजन्तुषु))।
स्वरूपधर्मम्वक्ष्यामि तन्मात्राणां यथार्थतः॥ 2:53॥

गन्धतन्मात्र गन्धन्तु नासिकाग्रेण गृह्णते।
रसतन्मात्र जिह्वायां रसं गृह्णाति संस्थितः॥ 2:54॥

रूपतन्मात्र चक्षुभ्यां रूपं गृह्णात्युपागतम्।
स्पर्शतन्मात्र स्पर्शन्तु गृह्णते त्वचमाश्रितः॥ 2:55॥

ग्राहकः शब्दतन्मात्रं श्रोत्रः शब्दत्वमागतः(?)।
≪सूक्ष्मत≫[3]न्मात्रधर्म्मो हि भूतानाम्प्रभृतिक्रमात्॥ 2:56॥

वैकारिकस्तद्बूर्द्धन्तु येन बध्यति पुद्गलः।
अहं विद्वानहं भोगी अहञ्जातो महत्कुले॥ 2:57॥

अहन्दाता च भोक्ता च रूपस्वी बाहुशालिनः।
मया जिताश्च सङ्ग्रामे शत्रुश्चैव पराजिताः॥ 2:58॥

धर्म्मशीलश्च गुणवान्ममत्वभ्यधिको कुतः।
अहम्पापी दुराचारो मूर्खश्चाहन्निराकृति[[((:))]]॥ 2:59॥

((न दत्तन्न))[4] च मे भुक्तम्मत्समो नास्ति दुःखितः।
इत्यहंकारचित्तानां ममत्वमनुवर्त्तिनाम्॥ 2:60॥

संसारगृहबन्धेन अहङ्कारस्तु बन्धते।

2:53 मनस्तु] *conj.*; --- तु NW; ⊔ षु K **2:53** ह्येतद्°] K; ह्येत NW **2:53** अनिवारितसम्मोही अजयः सर्वजन्तुषु] *conj.*; अनि --- N; ⊔ K; अनिर्वाण ⊔ अजयं सर्वजन्तुषु W **2:54** गृह्णते] N; गृह्यते K; गृह्णते W **2:55** गृह्णात्युपागतम्] N; गृह्णात्युपागतः; गृह्णात्युपोगतः W **2:55** त्वचमाश्रितः] K; वचमा?शृतः N; ⊔सृतः W **2:56** ग्राहकः शब्दतन्मात्रं] K; ग्राहंकः शब्दतन्मात्रं N; ग्राहकः शब्दत ⊔ W **2:56** श्रोत्रः शब्दत्वमागतः] K^{pc}; श्रोतशब्द --- N; श्रोतशुब्द ⁻मागतं W **2:56** °तन्मात्र°] *em.*; ---न्मात्र° N; ⊔ मात्र° K; ⊔ ≍ W **2:57** पुद्गलः] N; पुंगलः KW **2:58** सङ्ग्रामे] NW; मद्ग्रामे K **2:58** शत्रुश्चैव पराजिताः] K; शत्रु चैव पराजितां NW **2:59** °त्वभ्यधिको कुतः] NW; °त्वधिकः कुतः K **2:60** न दत्तन्न] W; --- N; न दत्त ⊔ K **2:61** बन्धते] NW; बद्धते K

उक्ताहङ्कारधर्म्मास्तु धीगुणाश्च निबोध मे॥ 2:61॥

धर्म्मं ज्ञानञ्च वैराग्यमैश्वर्यञ्च चतुर्त्थकम्।
अधर्म्मञ्च तथाज्ञानमवैराग्यमनैश्वरम्॥ 2:62॥

बन्धते सप्तधा सा तु ज्ञानभावेन मोक्षते।
बु[[द्धि(र)]][5]ध्यवसायेन करोति विकरोति च॥ 2:63॥

धर्म्मादीनान्तथाष्टानां लक्षणानि निबोध मे।
उप[[(वासं)]] जपम्मौनमक्रोधम्स्तेयवर्जितम्॥ 2:64॥

सत्यं शौचञ्च दानञ्च दया क्षान्तिश्च सर्वदा।
विद्याभ्यासश्च लज्जा च इन्द्रियाणाञ्च निग्रहः॥ 2:65॥

इष्टापूर्त्तञ्च तीर्त्थञ्च पितृणाञ्चैव तर्प्पणम्।
अभयं सर्वभूतानां जीवितस्य ((तु)) रक्ष[6]णं॥ 2:66॥

धीगुणः प्रथमो ह्येष धर्म्म इत्यभिशब्दितः।
धर्म्मकर्म्मनिबद्धानां संसारमनुवर्त्तिनाम्॥ 2:67॥

पुनस्स्वर्ग्गः पुनर्म्मर्त्त्यस्तिर्यक्त्वं च पुनः पुनः।
धर्म्मस्य भावमाख्यातं ज्ञानभावन्निबोध मे॥ 2:68॥

पिण्ड एष चतुर्विंशत् करणेन्द्रियसंयुतः।
प्राकृतस्स तु विज्ञेयो धर्म्माधर्म्मप्रवर्तकः॥ 2:69॥

अकर्त्ता ≪निर्गुणश्चाहं न≫ [f.34^r] मे बन्धो ऽस्ति प्राकृतः।
साङ्ख्यज्ञानम्मया प्रोक्तम्प्रकृत्या येन मुच्यते॥ 2:70॥

मुक्तः प्रकृतिसृष्ट्या तु पुनर्बध्नाति चेश्वरः।

2:61 उक्ताहङ्कारधर्म्मास्तु धीगुणाश्च] NW; उक्तोहंकारधर्मस्तु धीगुणांश्च K **2:63** बन्धते] NW; बध्यते K **2:63** मोक्षते] NW; मोक्षति K **2:63** बुद्धिरध्य°] K; बु ---ध्य° N; बुद्धिश्चो ⁻य° W **2:64** उपवासं जपं] K; उप ⌣सञ्जपम्°N; उप ⊔ञ्जप W **2:64** °मौनमक्रोधम्°] N; °मौनंमक्रोधं K; °मौनमक्रोध° W **2:66** रक्षणम्] *conj.* (cf. *Svacchandatantra* 12:46b); --- णं NW; ⊔ णाः K **2:68** तिर्यक्त्वं] K; तिर्यत्वञ्° NW **2:69** प्रवर्तकः] K; प्र ---ः N; ⌣र्वर्त ⌣ W **2:70** अकर्त्ता] K; अकर्मा? ि N; ⌣ ⌣ ⌣ W **2:70** निर्गुणश्चाहं न] *conj.*; ---ा N; ⊔ न K; ⊔ हन्न W **2:71** °सृष्ट्या] N; °सृष्टौ K; °शृष्ट्या W

पुनस्संसरते भूयो याव देवन्न विन्दति॥ 2:71॥

ईश्वरं सृष्टिकर्त्तारं सर्वजन्तुनिबन्धकम्।
वैराग्यात्त्यजते भोगान्दारांश्चाप्सरसोपमान्॥ 2:72॥

हस्त्यश्वरथयानानि सुहृन्मित्रधनानि च।
≪उपवा≫[2]सं जपन्तीर्थं पञ्चाग्नि जलशायिनम्॥ 2:73॥

तपां सेवन्ति घोराणि देहः सन्त्यज्यते क्षणात्।
गिरितोयविषाग्निभ्यो प्रहारोद्बन्धनाशकैः॥ 2:74॥

वैराग्यन्तु समाश्रित्य कुरुते साहसान्यपि।
ऐश्वर्यभावमापन्नो द्रव्ये तृप्तिर्न गच्छते॥ 2:75॥

न राज्येन च भोगैश्च परिवारायुधवाहनैः।
तपं व्रतञ्च मन्त्रांश्च ऐश्वर्यार्थी तु साध[3]येत्॥ 2:76॥

युद्धं द्यूतञ्च माया च चौरिकानृतहिन्सनम्।
अन्यान्यपि अयुक्तानि विस्रम्भच्छलघातनम्॥ 2:77॥

ऐश्वर्यं भावमापन्नो करोति च विहन्यते।
प्राणिहिन्सारतो नित्यं चौरिकानृतडम्भनम्॥ 2:78॥

वञ्चको दुःखदाता च भवेच्चाधर्म्मचेष्टितम्।
नास्ति धर्म्मो न चाधर्म्मो स्वर्गमोक्षञ्च को गतः॥ 2:79॥

2:71 याव देवन्न विन्दति] *conj.*; यावदेवन्न विंन्दति N; यावद्देवं न विन्दति K; यावरे ⊔विंदति W **2:73** (सुहृन्मित्र)धनानि च] K; सु ---धनानि --- N; सु ⁻न्मि ⁻धनानि च W **2:73** उपवासं] *conj.*; --- ≍ ाञ् N; ⊔ सं KW **2:73** जपन्तीर्थं] N; जपेत्तीर्थं K; जपन्तीर्थ W **2:73** °शायिनं] N; शायिनः K; सायिनं W **2:74** तपां] NW; तपः K **2:74** सन्त्यज्यते] NK^{ac}W; संत्यजते K^{pc} **2:74** °भ्यो प्रहारोद्बन्ध°] *conj.*; °भ्यो प्रहारो बन्ध° NW; °भ्यः प्रहारैर्बन्ध° K **2:75** समाश्रित्य] K; समाशृत्य NW **2:75** द्रव्ये] NW; द्रव्य° K **2:76** राज्येन] NW; राज्यैर्न K **2:76** तपं व्रतं च] NW; तपो व्रतश्च K **2:76** मन्त्रांश्च ऐश्वर्यार्थी तु साधयेत्] *conj.*; मन्त्राश्च ऐश्वर्या --- त् N; मन्त्राश्च ऐश्वर्य्या ⊔ येत् K; मन्त्राश्च ऐश्व ≍ र्था तु ⊔ येत् W **2:78** ऐश्वर्यभावमापन्नो] *em.*; ऐश्व+र्यं+ भवमापन्नो N; ऐश्वर्यभावमापन्नः K; ऐश्वर्यं भावमापन्नो W **2:78** °डम्भनम्] NW; °भर्त्सनः K **2:79** °चेष्टितम्] NW; चेष्टितः K **2:79** चाधर्म्मो] NW; चाधर्मः K **2:79** स्वर्ग°] NW; स्वर्गं K

अज्ञानभावमापन्नो ((सर्वमिथ्ये))ति चक्षु ते?।
नित्यदुःखी परप्रेष्यो भारयानं वहत्यपि॥ 2:80॥

कृच्छ्रजीवी च सततमवैराग्यान्न खिद्यते।
राज्यङ्कृत्वा तु सामन्तम्सामन्ताद्ग्रामिको भवेत्॥ 2:81॥

ग्रामाङ्गृष्टस्तु लब्धेन(?) वर्त्तते स त्वनीश्वरः।
न शोचते न चोद्वेगः पूर्वराज्येव क्रीडते॥ 2:82॥

अनैश्वर्यस्य भावो ऽयमेष ते समुदाहृतः।
अव्यक्तं त्रिगुणं ((वक्ष्ये)) [5] ((सं))सारस्य प्रवर्त्तकम्॥ 2:83॥

यतस्सर्वजगोत्पत्तिः प्रकृतिस्तेन सोच्यते।
तस्य धर्म्मान्प्रवक्ष्यामि सत्त्वरजस्तमोत्कटान्॥ 2:84॥

प्रकाशन्तु भवेत्सत्त्वं धर्म्मसत्यसमन्वितम्।
संविभागी च सततं अदृशं सत्त्वकारितम्॥ 2:85॥

क्षमादयासमायुक्तो ज्ञानविज्ञानपारगः।
प्रीतिर्दानन्धृतिर्मेधा तपः शौचं दमस्तथा॥ 2:86॥

अदृष्टेषु समदृष्टिर्[6]((दि))व्यबुद्धिप्रबोधकः।
यस्मिन्नेतानि धर्म्माणि भवन्ति पुरुषोत्तमे॥ 2:87॥

स सात्त्विकस्तु विज्ञेयो रजोधर्मञ्च मे शृणु।
निस्त्रिंशश्चातिलोभी च विद्वेषी क्रोधनस्तथा॥ 2:88॥

कामी हर्षसमाविष्टो दुःखार्त्तो-म्-अटते सदा।

2:80 सर्वमिथ्येति] W; --- [4] ≍ ति N; ष्यति K **2:80** चक्षु ते] NK; चस्यते W **2:82** स त्वनीश्वरः] NW; सद्ध?नीश्वरः K **2:82** °राज्येव] NW; °राज्ये च K **2:83** अव्यक्तं त्रिगुणं] K; अव्यक्त --- N; अव्यक्तन्तृगुणं W **2:83** वक्ष्ये] *conj.*; --- NK; वक्ष्येत् W **2:83** प्रवर्त्तकम्] NW; प्रवर्त्तकः K **2:84** प्रकृतिस्तेन] K; प्रकृतितेन NW **2:85** °समन्वितम्] NW; समन्वितः K **2:85** अदृशं] NW; अदृसं K **2:86** °पारगः] NW; °पारग K **2:86** धृतिर्मेधा] K; धृतिमेधा NW **2:86** शौचं] K; शौच° NW **2:86** दमस्तथा] NW; द ≍स्तथा K **2:87** समदृष्टिर्दिव्य°] *conj.*; --- स --- व्य° N; ⊔ त्य° N; ससमं ⊔ दिव्य° W **2:89** दुःखार्त्तोमटते] NW; दुःखार्त्त अटते K

मानी दम्भसमायुक्तो ह्यहंकारे व्यवस्थितः॥ 2:89॥

नित्यं युद्धरतः ≪शूरः≫ रा≪जसं गुणलक्षणम्≫।
((काम)) ≪क्रोधा≫ [f. 34^{v}] [[((भि))]] भूतश्च लोभेन च समन्वितः॥ 2:90॥

ईर्षालुश्च विषादी च मदन्मुन्मादचेष्टवान्।
निद्रालस्यमकर्म्मित्वन्दुर्मेधाज्ञानमेव च॥ 2:91॥

अधर्म्मताबुद्धिमतो नास्तिक्यञ्चलचित्तता।
तमस्येतानि चिह्नानि यस्मिन्दृश्यति जन्तवे॥ 2:92॥

तामसो हि स विज्ञेयो पुरुषः [[(क)]] लुषात्मकः।
एतत्तु गुण≪मव्यक्तं त्रिगुणं समुदा≫हृतम्॥ 2:93॥

[2] विदित्वा प्राकृतैर्बन्धैर्मुच्यते न च मुच्यते।
गुणा धर्म्मा न चाव्यक्तं धीहंकारगुणो न हि॥ 2:94॥?

तन्मात्रेन्द्रियधर्म्मेण महाभूतगुणेन च।
करणेन्द्रियहीनत्वाद्भूततन्मात्रवर्जितः॥ 2:95॥

अकर्त्ता निर्गुणश्चैव चिन्मात्रः पुरुषः स्मृतः।
मानसं वाचिकञ्चैव शारीरं कर्म्म यत्कृतम्॥ 2:96॥

प्रकृत्या कारितम्मन्ये अकर्ता पुरुषोच्य [[((ते))]]।
[3] [[ए]]वं सन्न्यस्य कर्म्माणि प्रवर्त्तस्तानि सर्वतः॥ 2:97॥

नाहं कर्त्ता न मे बन्धो ह्येवं बुध्यन्ति ये नराः।
प्रकृत्या ते विमुच्यन्ते यावन्न सृजतेश्वरः॥ 2:98॥

2:90 युद्धरतः] *em.*; युद्धर --- NW; युद्धरत K **2:90** रा] NW; ⊔ K **2:90** लोभेन] NW; लाभेन K **2:91** मदन्मुन्माद°] N; मदभून्माद° K; मदन्मु ⊔द° W **2:91** °चेष्टवान्] KW; चेष्टंवान् N **2:92** चिह्नानि] KW; चिंह्नानि N **2:93** विज्ञेयो] NW; विज्ञेयः K **2:93** एतत्तु] NW; एतत्त K **2:93** गुणमव्यक्तं त्रिगुणं समुदाहृतम्] *conj.*; ---म्स --- N; गुण ⊔ K; ¯ ण ⊔ हृतः W **2:94** विदित्वा] *conj.*; --- NK; ⊔ त्वा W **2:94** °बन्धैर्°] K; °बन्धै° NW **2:94** गुणा धर्म्मा न चाव्यक्तं] NW; गुणधर्म्मो न चाव्यक्त° K **2:96** निर्गुण°] K; निर्गुण° NW **2:97** सन्न्यस्य] *conj.*; सत्यस्य NKW

साङ्ख्यज्ञानम्मया प्रोक्तम्मुक्तिरित्यभिशब्दिता।
न हि मुक्तिर्भवेत्तस्य किञ्चित्कालं विदेहता॥ 2:99॥

तिष्ठेत्प्रकृतिनिर्म्मुक्तस्सृष्टिसंहारवर्जितः।
यावन्न सृजते सृष्टिमीश्व[(((रः)))] [4] परमेश्वरः॥ 2:100॥

तावत्प्रकृतिबन्धेन संसारे क्षिप्यते पुनः।
क्षिप्तस्तु जायते भूयो जातस्संसरते पुनः॥ 2:101॥

धर्म्माधर्म्मनिबद्धस्तु साङ्ख्यज्ञानेन मोहितः।
अहं कर्त्ता अहं भोक्ता ईश्वरो बलवानहम्।
ममत्वेनैव संमूढो भ्रमते घटियन्त्रवत्॥ 2:102॥ ⊗॥

नयसूत्रे प्रकृतिविचारो द्वितीयः पटलः श्लो अ2॥

[5] ईश्वर उवाच।
साङ्ख्यज्ञानम्मया प्रोक्तं शृणु ध्यानाधिदैवतम्।
पृथ्वी कठिनरूपेण चतुस्सागरमेखला॥ 3:1॥

सपर्वतवनाकीर्ण्णा मृगपक्षिसमाकुला।
स्थिरा पीतकवर्ण्णाभा पूर्वबीजसमुत्थिता॥ 3:2॥

ध्यायतः सिद्धिमभ्येति विषसत्त्वानि स्तम्भयेत् ।
अचाल्यस्सर्वभूतानां यथैव वसुधा भवेत्॥ 3:3॥

जलपूरितस[6]र्वांगो जलध्यानेन पूरयेत्।
एवमभ्यसमानस्तु विषसत्त्वानि नाशयेत्॥ 3:4॥

---

1 This entire chapter has been adapted to create *Svacchandatantra* 12:83–157, for which see Appendix II.

2:102 घटि°] NW; घटी° K **2:102** श्लो अ2] NW; श्लो ⊔ K **3:1** उवाच] K; उ NW **3:3** सिद्धिमभ्येति] K; सिद्धमभ्येति N; सिध्यन्येति W **3:3** स्तम्भयेत्] NW; स्तम्भयन् K **3:4** °सर्वांगो] W; --- र्वांगो N; °सर्वागो K

तृप्तो दाघविनिर्मुक्तस्सर्वमीतिविवर्जितः।
जगदापूरयेत्सर्वम्पूर्वबीजविचिन्तकः॥ 3:5॥

स्वशरीरोत्थितो वह्निर्ज्वलन्तो जगदाहकः।
कुर्यात्कर्म्मसहस्राणि स्वबीजेन तु चिन्तकः॥ 3:6॥

[f. 35^r] ≪कृष्णरे≫ण्वाकुलो वायुर्ध्यायेद्बीजेन संयुतः।
पूरयन्तो जगद्देहं सिद्धिश्चाश्चर्यकर्म्मकृत्॥ 3:7॥

सुशिरात्मकं स्वदेहञ्चगच्च सुशिरात्मकम्।
ध्यायेत्प्रकृतिबीजेन चित्रकर्माणि कारयेत्॥ 3:8॥

वागेन्द्रियन्तथा वह्निर्ध्यातो वाक्सिद्धिदायकः।
इन्द्र+:+ पाणिमभिध्यात अजयः बाहुशालिनः॥ 3:9॥

पादप्र ≪चा≫रम्पद्मान्तु ≪ध्यातो विष्णुः ≫[2] [[((प्र))]]दायकः।
पायौ मित्रं सितन्ध्यातः पायुव्याधिविनाशनः॥ 3:10॥

शिश्ने प्रजापतिः श्यामो ध्यायेद्युक्तेन चेतसा।
जितेन्द्रियश्च भवते इच्छया रमते शतम्॥ 3:11॥

श्रोत्रेन्द्रिये दिशाश्चित्रा ध्यायेद्बीजेन संयुताः।
सकृदुक्तं श्रुतङ्गृह्णेद्दिशायात्रा च सिद्धते॥ 3:12॥

मरुतं कृष्णरूपेण ध्यायेद्वचसि संस्थितः।

3:5 दाघ°] KW; दोघ° N **3:5** °मीतिविवर्जितः] NW; °भीतिविवर्जितः K **3:6** °ज्वलन्तो जगदाहकः] NW; °ज्वलत्तेजस्स दाहकः K **3:6** स्वबीजेन तु] *conj.*; स्व ≃ा न तु N; स्वकीयेन तु K; स्वकं ¯तु W **3:6** चिन्तकः] W; चि --- N; चित्त(तैः) K **3:7** कृष्णरेण्वाकुलो] *conj.*; ---ण्वाकुलो N; ⊔ ष्णा कुलो K; ⊔ ष्णऋएणो कुलो W **3:8** च सुशिरात्मकम्] NW; च सुशिरात्मकः K **3:8** ध्यायेत्प्रकृतिबीजेन] N; ध्यायन्प्रकृतिबीजेन K; ध्यायेत्प्रन्द ि रीजेन W **3:9** वागेन्द्रिय°] NK; वागीन्द्रिय° W **3:9** बाहुशालिनः] N; बाहुसालिनः W; बाहुशालनः K **3:10** पादप्रचारम्पद्मान्तु] *conj.*; पादप्र --- N; पाद(प्र ⊔) रं पद्मां K; पाद ⊔ रम्पद्मान्तु W **3:11** प्रजापतिः श्यामो] NW; प्रजापतिं श्यामं् K **3:11** भवते] NW; भवति K **3:12** दिशाश्चित्रा] NW; दिशां चित्रां K **3:12** संयुताः] NW; संयुतां K **3:12** गृह्णेद् °] N; गृह्णं K; गृह्ण° W **3:12** °यात्रा च सिद्धते] *conj.*; °यात्राश्च सिद्धते NW; °यात्रा च सिद्धति K **3:13** संस्थितः] NW; संस्थितम् K

शस्त्रदंष्ट्रिण((भेदैश्च न)) [3] त्वगे जायते व्यथा॥ 3:13॥

आदित्यञ्चक्षुषि ध्यायेज्जिह्वायां वरुणस्थितः।
नासिके पृथिवी पीता ध्यायेच्चन्द्रं मने स्थितम्॥ 3:14॥

पीतकं गन्धतन्मात्रं रसतन्मात्र शुक्लकम्।
रूपतन्मात्र रक्तन्तु स्पर्शतन्मात्र कृष्णकम्॥ 3:15॥

अरूपं शब्दतन्मात्रं ध्यातव्यं बिन्दुरूपिणम्।
विषये चेप्सितां सिद्धिञ्चिन्तितञ्च विजानते॥ 3:16॥

वैकारिके तथा रुद्रो ध्यातव्यो सिद्धिमिच्छता।
ध्यानात्सिद्धिमवाप्नोति मुक्तो ऽहङ्कारबन्धनात्॥ 3:17॥

ब्रह्माणं बुद्धिसंस्थन्तु ध्यायेद्युक्तेन चेतसा।
पूर्वबीजमभिध्यानाज्ज्ञानौघस्सम्प्रवर्त्तते॥ 3:18॥

दिव्यबुद्धिश्च भवते संशयच्छेदकारिणी।
भूतम्भव्यम्भविष्यञ्च प्रत्यक्षन्तस्य जायते॥ 3:19॥

प्रकृतिः कृष्णवर्णा तु शुक्लरक्ता विराजते(?)।
रक्तं च हृदयन्तस्य बाहुपादभुजानना॥ 3:20॥

ध्यात्वा प्रकृतिबीजेन यदिच्छेत्सिद्धिमात्मनः।
सिद्धश्चैव स्वतन्त्रश्च दिव्यसृष्टिः प्रजायते॥ 3:21॥

षण्मासाद्ध्यानयोगेन दिव्यसिद्धिः प्रजायते।
त्रैलोक्ये यः प्रवर्त्तेत प्रत्यक्षन्तस्य जायते॥ 3:22॥

एष ते प्राकृतो योग उक्तो मोक्षकरः परः।
पुरुषन्तत्परत्वेन हृदिपद्मे (([[व्य]]वस्थितः)) ॥ 3:23॥

3:13 त्वगे] N; ⊔ गे KW **3:14** ध्यायेज्°] NW; ध्यायं K **3:14** पृथिवी पीता] NW; पृथिवीं पीतां K **3:14** मनेस्थितम्] NW; मनःस्थितम् K **3:17** तथा रुद्रो ध्यातव्यो] W; त --- [4] ा तव्यो N; तथा रु ⊔ध्यातव्यः K **3:20** प्रकृतिः] K; प्रकृति NW **3:20** शुक्लरक्ता] NW; शुक्ला रक्ता K **3:20** रक्तं च हृदयन्तस्य] W; --- [5] न्त स्य N; रक्तञ्च ⊔तस्य K **3:21** दिव्यसृष्टिः] NK; दिव्यदृष्टिः W **3:23** पुरुषन्°] NWपुरुषस्° K **3:23** हृदिपद्मे] K; हृदिप ⌣ N; हृदिपद्म W

[6] चित्स्वरूपेण पिण्डेन देहमापूर्य यत्स्थितम्।
स बीज इति विख्यातो येन जीवति तत्पुरम्॥ 3:24॥

निर्गतेन मृतश्चैव अचेता शीर्यते पुनः।
बध्यते मुच्यते सो हि सुखदुःखञ्च विन्दते॥ 3:25॥

न तस्य रूपवर्ण्णं वा प्रमाणम्पश्यते क्वचित्।
अशक्यः कथितुं वापि [f.35^v] ≪सूक्ष्मस्य देह≫((धा[[रि]]))णः॥ 3:26॥

बालाग्रशतभागस्य शतधा कल्पितस्य च।
तस्य सूक्ष्मतरो जीवस्स चा[[भे]]दाय कल्पते॥ 3:27॥

आदित्यवर्ण्णं रुग्माभमापबिंद्वेव पुष्करे।
तारकेव तु लक्षेत योगी दिव्येन चक्षुषा॥ 3:28॥

दक्षिणेन सिताङ्गा तु वामतो कृष्णरूपिणी।
तद्वर्ण्णानि च वस्त्राणि ≪मण्डनानि विशेषतः॥ 3:29॥

कर्मबन्धेन बध्नाति सुख≫[2]((दुः))खं प्रयच्छते।
नियतीन्तां विजानीयादनिवार्य सुरासुरैः॥ 3:30॥

पूर्वबीजमभिध्यानाद्रूपेण च समन्विता।
ध्यानात्सिद्धिमवाप्नोति नियत्या चैव मुच्यते॥ 3:31॥

त्रिनेत्रन्तु चतुर्वक्त्रं कृष्णवर्णञ्चतुर्भुजम्।
संहरन्तन्दुराधर्षमनन्तं कालमीश्वरम्॥ 3:32॥

स्वबीजकालरूपज्ञो न कालः कलयिष्यते।

3:24 °पूर्य यत्स्थितम्] NW; °पूरयन् स्थितः K **3:24** °पुरम्] NW; °पुरः K **3:25** शीर्यते] N; म्रीयते K; सीयते W **3:25** सुखदुःखञ्च] NW; सुखं दुःखं च K **3:26** रूपवर्ण] NW; रूपं वर्णं K **3:26** क्वचित्] W; क्व ∴ि ∴ N; ⊔ K **3:26** अशक्यः कथितुं वापि] *conj.*; अशक्यः --- N; ⊔ K; ⊔ कथितु W **3:28** रुग्माभ°] N; रुग्माभ° KW*CHECK*! **3:29** तद्वर्ण्णानि च वक्त्राणि] N; ⊔ KW **3:29** मण्डनानि विशेषतः] *conj.*; म --- N; ⊔ KW **3:32** °चतुर्भुजम्] KW; °चतुभुजम् N **3:33** स्वबीज°] *conj.*; सुबीज° N; सुबीजः K; ⁻बाज° W

चक्रवत्परि [[(वर्त्तन्ते)]] [3] [[((का))]]लध्यानविवर्जिताः॥ 3:33॥

एवं कालं सदा ध्यायेद्येन सिद्धिश्च शाश्वती।
कृष्णवर्णा च रक्ताक्षी दीर्घदन्ता सुलोमशा॥ 3:34॥

कुचोर्ध्वपिङ्गकेशी च स्थूलकाया महोदरा।
या पातयति भूतानि ब्रह्माद्यानि पुनः पुनः॥ 3:35॥

निर्वैरपरिपन्थिन्या माया ग्रन्थिदुरत्यया।
सांख्यवेदपुराणज्ञा अन्यशास्त्रप्रयोगिनः॥ 3:36॥

न ते ((लंघयितुं)) [4] शक्ता ये चान्ये मोक्षवादिनः।
क्लिश्यन्ते मायया भ्रान्ता अमोक्षे मोक्षनिश्चिताः॥ 3:37॥

स्वबीजध्यानयोगेन पूर्वध्यानादिरूपकैः।
दीक्षासिना तु ताञ्छित्त्वा गच्छते शिवमव्ययम्॥ 3:38॥

चतुर्वर्णा भवेद्विद्या अवर्णा वापि कथ्यते।
सितरक्तपीतकृष्णा ध्यातव्या सुशिरात्मिका॥ 3:39॥

आकाशवायुमारूढा रूप[[((यौव))]][5]नशालिनी।
स्वबीजेन तु सद्भावं साधके सिद्धिदायिका॥ 3:40॥

विद्यासिद्धिमवाप्नोति सिद्धस्सर्वत्र सङ्क्रमेत्।
देवलोकानि सर्वाणि कामरूपश्च जायते॥ 3:41॥

कुङ्कुमाभार्धनारीशन्त्रिनेत्रन्तु जटाधरम्।
पूर्ववक्त्रमभिध्यानाद्वायुभक्षाम्बुदस्थितम्(?)॥ 3:42॥

तस्य पुण्यमवाप्नोति अश्वमेधायुतस्य च।
जगच्च वशमा[[((या))]][6]ति क्रमते सिध्यतेति च॥ 3:43॥

3:34 रक्ताक्षी] N; नक्ताक्षी K; वक्ताक्षी W **3:34** सुलोमशा] NK; सुलोमसा W **3:36** °पन्थिन्या] N; पन्थिन्यो K; पथिन्या W **3:36** अन्यशास्त्रप्रयोगिनः] *conj.*; अन्यशास्त्रयोगिना NW (unmetrical); अन्यशास्त्रयोगिणः K (unmetrical) **3:37** न ते] *em.*; न --- N; ⊔ K; न ता W **3:37** लंघयितुं] W; ⌣ंघयितुं N; लक्षयितुं K **3:37** °वादिनः] K; वादिना NW **3:42** जटाधरम्] K; जाठाधरं N (unmetrical); ज ¯धरं W **3:42** °भक्षाम्बु°] NW; °भक्ष्याम्बु° K

षड्भिर्मासैर्न्न सन्देहो दक्षिणन्तु तथैव हि।
नीलाम्बुदप्रतीकाशम्पिङ्गभ्रूश्मश्रुलोचनम्॥ 3:44॥

भृकुटीकरालवक्त्रं कपाली सर्पभूषितम्।
बहुरूपं जटाधारन्दक्षिणास्यन्तु चिन्तयेत्॥ 3:45॥

सर्वदुष्टविनाशाअय ≪ईतिजरा≫ [f. 36^r] विनाशनम्।
विषग्रहादिसत्त्वानि ध्यातो नाशयते क्षणात्॥ 3:46॥

अग्निवज्ज्वलते योगी जरामृत्युविवर्जितः।
क्रमते सर्वलोकानि सिध्यते च शिवो भवेत्॥ 3:47॥

सितन्त्रिनयनं वक्त्रं अक्षसूत्रकमण्डलुम्।
पश्चिमं वदनं ध्यायेद्दिव्यसिद्धिप्रदायकम्॥ 3:48॥

≪हत्वा≫ ((प्राणिसहस्राणि परदा)) ≪र≫ ((शतानि च))।
((अलेपको विशुद्धात्मा)) सिध्यते च शिवो भवेत्॥ 3:49॥

द्विनेत्रमुत्तरं वक्त्रन्नीलोत्पलकरन्तथा।
ध्यानात्तस्य जगत्सर्वं वशामायात्यसंशयः॥ 3:50॥

तपते वर्षते चैव सृजते संहरेति च।
ईप्सिता तु भवेत्सिद्धिर्यो ऽब्दमेकन्तु चिन्तयेत्॥ 3:51॥

सितम्मूर्ध्नि सदा ध्यायेच्छूलहस्तञ्जटाधरम्।
व्याघ्रयज्ञोपवीतेन अक्षसू [[((त्रकम))]] ण्डलुम्॥ 3:52॥

≪वीणाडम≫ [3]((रु [[क]])) हस्तन्नागयज्ञोपवीतिनम्।

3:44 षड्भिर्मा°] K; षड्भि मा° NW **3:45** भृकुटी°] NW; भ्रुकुटी° K **3:45** °दक्षिणास्यन्तु] NW; °दक्षिणस्य तु K **3:46** सर्वदुष्टविनाशाय] *conj.*; सर्वदुष्टविनाशं च K; सर्वदुष्टवि --- N; सर्वदुष्टविनाशा W **3:46** ईतिजराविनाशनम्] *conj.*; विनाशनम् K; --- N; र विनासनम् W **3:48** °प्रदायकम्] W; °प्रदा ≍क --- N; °प्रदायिवा (?) K **3:49** हत्वा प्राणिसहस्राणि पर दारशतानि च] *conj.*; ≍ ≍ सहस्रानि परदा ≍ शतानि च W; --- NK **3:49** अलेपको विशुद्धात्मा] W; --- मा N; ⊔ K **3:50** वशामायात्यसंशयः] N; वसमायात्यसंशयः K; वशमायात्यसंशयः N **3:51** °मेकन्तु] NW; °मेक तु K **3:52** सदा ध्या°] NW; समाध्या° K

चन्द्रमूर्धोर्द्धलिङ्गन्तु ध्यायेन्नित्यम्महेश्वरम्॥ 3:53॥

ईप्सिता च भवेत्सिद्धिर्विग्रहं यो ऽभ्यसेत्सदा।
अनेनैव स्वदेहेन सर्वज्ञः कामरूपवान्॥ 3:54॥

अथवा घण्टशब्देन सिद्धिः षाण्मासिका भवेत्।
ईप्सिता सर्वलोकेषु सिद्धिरेव प्रजायते॥ 3:55॥

लिङ्गद्वयन्तु यो ध्यायेत् पूर्वबीजेन संयुत [[((म्))]] ।
[4] ≪मासेनै≫((केन)) ततः पश्ये+त्+ सूक्ष्मलिङ्गन्ततोपरि॥ 3:56॥

शुद्धस्फटिकसंकाशन्तन्दृष्ट्वा तु विमुच्यते।
सिद्धिश्च मानुषे लोके षण्मासेन तु जायते॥ 3:57॥

त्रैलोक्यदर्शी सिद्धिश्च प्रत्यक्षन्तस्य जायते।
क्रमते सर्वलोकानि ईश्वरेण समो भवेत्॥ 3:58॥

सोमादित्यौ स्थितौ नेत्रे चक्रे चैकरथस्य तु।
भूततन्मात्र वाजीनि मनस्सारथि [[((चो))]][5]दितः॥ 3:59॥

अहङ्कारो भवेद्योधा गुणाश्चैव महाधनुः।
इन्द्रियाणि शरास्तस्य मृगो धर्म्मः प्रकीर्त्तितः॥ 3:60॥

यद्येवं क्रीडते नित्यमीश्वरो हृदि संस्थितः।
पुण्यपापैः प्रवर्त्तन्तो इच्छया परमेश्वरः॥ 3:61॥

नाहं कर्त्ता न मे बन्धो सर्वञ्चेश्वरकारितम्।
मत्वा चेश्वरविज्ञानं सर्वकर्माणि[6] कारयेत्॥ 3:62॥

धर्म्माधर्मस्य कर्त्तृत्वे प्रेरको हृदि संस्थितः।

3:53 °मूर्धोर्द्ध°] N; °मूर्धोद्ध° K; °मू ⁻ओर्द्ध° W **3:55** घण्टशब्देन] N; ␣मब्दे-न K; घण्ठशब्देन W **3:57** तद्दृश्ट्वा] N; तं दृश्ट्वा KW **3:57** सिद्धिश्च] *conj.*; सिद्धश्च NKW **3:58** त्रैलोक्यदर्शी] NW; त्रैलोक्यदर्शी° K **3:60** इन्द्रियाणि] *em.*; ईन्द्रियाणि NKW **3:61** प्रवर्त्तन्तो इच्छया] N; प्रवर्त्तन्ते ईच्छया K; प्रवर्त्तन्तो ईछया W **3:62** बन्धो] NW; बन्धः K **3:62** °कर्माणि] KW; °कम --- N

त्वमेव शरणापन्नो न मे बन्धो ऽस्ति कर्त्तृतः॥ 3:63॥

सदाशिवोष्टभेदेन दिनरात्र्ययनानि च।
दक्षिणोत्तरसङ्काशो जातो विषुवमोक्षदः॥ 3:64॥

[[((वं))]] ≪शध्व≫ [f. 36^{v}] [[((नि))]] समप्रख्यः शान्तनादस्तु स स्मृतः।
सदाशिवस्तु विज्ञेयो ध्यानयोगबलं शृणु॥ 3:65॥

मासाङ्गवति रूपस्वी वागीशस्तु द्वितीयके।
तृतीये पश्यते सिद्धो दिव्यदृष्टिश्चतुर्थके॥ 3:66॥

सिद्धिस्तु मानुषे ((लो))के ≪वत्सरार्धान्न संश≫यः।
दिव्यसिद्धिः तथाब्देन सायोज्यन्तु द्वितीयके॥ 3:67॥

षण्मुखङ्कारणङ्कृत्वा ध्यायेद्देवं सदाशिवम्।
दशधा वर्ण्णरूपेण दृश्यते च सदाशिवम्॥ 3:68॥

सितं रक्तञ्च पीतञ्च कृष्णं हरितपिङ्गलम्।
नीलञ्चित्रकवर्ण्णञ्च स्फटिकाभम्मनोरमम्॥ 3:69॥

दृष्ट्वा सर्वाणि रूपाणि त्यजेत्तानि विचक्षणः।
एक एव तदा गृह्येच्छेषान्ये गणरूपकाः॥ 3:70॥

चन्द्रमण्डलसंकाशं विद्युत्पुञ्जसमप्रभम्।
तारकाचलिताकारं बिन्दुन्देवस्य लक्षणम्॥ 3:71॥

निवृत्तिश्च प्रतिष्ठा च विद्या शान्तिस्तथैव च।
कलाचतुष्टयो ऽप्येवं ज्ञातव्यं बिन्दुरीश्वरम्॥ 3:72॥ ⊗॥

3:64 दक्षिणोत्तरसङ्काशो] K; ⩵⩵णोत्तरसङ्का ⩵ N; दक्षिणान्तरस ⊔ W **3:65** शान्त°] NK^{pc}; सान्त° K^{ac}W **3:66** सिद्धो] K; सिद्धा NW **3:67** वत्सरार्धान्न संशयः] *conj.*; ⩵ ⩵ यः N; ⊔ KW **3:67** दिव्यसिद्धिः तथाब्देन सायोज्यन्तु द्वितीयके] *conj.*; --- द्धि तथाब्धेन सा ⩵ ⩵ --- [2]दिके N; ⊔ ब्दिके K; ⊔ सिद्धि ¯ ब्देन सायोज्यन्तु --- ब्दिके W **3:68** च] KW; चं N **3:70** एक एव तदा गृह्येच्छेषान्ये] *conj.*; एक एव --- ह्येछेषान्ये N; एक एव न ⊔ हो ⊔ न्ये K; एक एव त ⊔ गृहेच्छेषान्ये W **3:72** बिन्दुरीश्वरम्] NW; बिन्दु ईश्वरम् K

॥ ⊗॥ इति निश्वासतत्वसंहितायां नयसूत्रे [4] ((त)) ≪त्त्व≫ [[[((रू))]] पविचार-

स्तृतीयः पटलः॥ ⊗॥ श्लो 7 7 5॥ ⊗॥

देव्युवाच।
का निवृत्तिः प्रतिष्ठा च विद्या शान्तिस्तथैव च।
तत्त्वं सद्भावतो ब्रूहि कलाभेदश्च कः स्मृतः॥ 4:1॥

ईश्वर उवाच।
निवृत्तिः प्रकृतिर्ज्ञेया प्रतिष्ठा सकला स्मृता।
अंशिरशुद्धविद्या च शान्ति माया वि [[((शुद्धि))]] [5] का॥ 4:2॥

एवं सदाशिवं ज्ञात्वा शुद्धाशुद्धे व्यवस्थितम्।
मुच्यते सर्वबन्धैस्तु शिवं याति निरामयम्॥ 4:3॥

योगेन च भवेत्सिद्धिर्यो ध्यायेत चतुष्कलम्।
सितरक्तपीतकृष्णन्ध्यानात्सिद्धिर्यथेप्सिता॥ 4:4॥

अभिन्नेन शरीरेण शिवसायोज्य [[((तां व्रजेत्))]] । [6]
ऐश्वर्याणि च कुरुते यथेष्टम्भूतले सदा॥ 4:5॥

दानतीर्थव्रतं स्नानं संयमञ्जपपूजनम्।
अग्निहोत्राश्रमाधर्म्मा कलां यो च न विन्दते॥ 4:6॥

चतुष्कलपरिज्ञानी ((न लिप्ये ⊔पापकैः)) ।
[f. 37^r] ≪प्रथमा तु कला≫ सूक्ष्मा सुसूक्ष्मा च द्वितीयका॥ 4:7॥

अमृता तु शिरो ऽवस्था चतुर्थी चामृतामृता।

3:72 श्लो 7 7 5] NW; श्लोकः - K **4:1** कः] K; क NW **4:2** उवाच] K; उ NW **4:2** अंशिर] N; अंशिरस् K; अंसिर W **4:2** शान्ति] NW; शान्तिर् K **4:4** °पीतकृष्णन्] NW; पीतकृष्ण° K **4:6** दानतीर्थव्रतं] NW; दानं तीर्थं व्रतं K **4:6** °कलां या] N; °कलां यो W; कला या K **4:6** बिन्दते] W; बिन्द ≃ N; बिन्दुना K **4:7** न लिप्ये ⊔पापकैः] W; ≃ि --- N; न लिप्तो ⊔ K **4:7** ---सूक्ष्मा सुसूक्ष्मा च द्वितीयका] N; ⊔ सूक्ष्मं च द्वितीयकम् K; ⊔ सूक्ष्मं च द्वितीयका W **4:8** अमृता तु शिरो ऽवस्था] K; अमृता तु शिरावस्था N; अमृतान्तुं शिरावस्था W

चत्वार्येतानि शक्तेस्तु कलानि कथितानि वै॥ 4:8॥

ज्ञात्वैतानि विमुच्यन्ते किम्पुनर्दृष्टलक्षणः।
स्फोटशब्दन्तु तस्यैव यदि यो ऽन्ते(?) --- ।
--- ॥ 4:9॥

--- [2] [[प((र))]]मसङ्गावं यद्गत्वा न निवर्त्तते।
दृष्ट्वा चैव महाशक्तिं गुरुं शिवसमं विदुः॥ 4:10॥

देव्युवाच।
शिवे चैव निरालम्बे योगश्चैव कथम्भवेत्।
समरसञ्च पुनर्भूत्वा शिवत्वं लभ्यते कथम्॥ 4:11॥

ईश्वर उवाच।
चक्षुषा यच्च दृश्येत वाचया यच्च गोचरम्।
मनश्चिन्तयते यानि ((बुद्धिश्च व)) --- [3] [[((क))]]ल्पयेत्॥ 4:12॥

अहङ्कृतानि तान्येव यच्च रूपेण संस्थितम्।
यत्र नास्ति स तत्रैव अन्वेष्टव्यं स्वदेहतः॥ 4:13॥

यत्र तत्र स्थितो देशे यत्र तत्राश्रमे रतः।
स्वस्तिकम्पद्मकम्भद्रमर्द्धचन्द्रम्प्रसारितम्॥ 4:14॥

सापाश्रयं अञ्जलिकं योगपट्टं यथासुखम्।
अष्टासनानि मुख्यानि कीर्तितानि समासतः॥ 4:15॥

एषा[[मेक(तमं ब)]]द्धा पूजयित्वा महेश्वरम्।
कर्म्मणा मनसा मन्त्री एकचित्तस्सुयन्त्रितः॥ 4:16॥

पूर्वाचार्यान्नमस्कृत्वा अभावं भावयेत्सदा।

4:9 °लक्षणः] NW; °लक्षणम् K **4:9** स्फोट°] N; ⊔ म्स्ख्W **4:9** न्ते(?)] N; ⊔ KW **4:11** योगश्चैव] NW; योगश्चैव K **4:12** उवाच] K; उ NW **4:12** चक्षुषा यच्च दृश्येत वाचया यच्च गोचरम्] NW; चक्षु यो यच्च दृश्येत वाचं यावच्च गोचरम् K **4:12** यानि बुद्धिश्च व] W; यानि --- N; तानि बुद्धि --- K **4:13** अन्वेष्टव्यं] N; संचेष्टव्यं K; भंधेष्टव्यं W **4:15** सापाश्रयं अञ्जलिकं] NW; सायाश्रययमंजलिकं K **4:16** एषामेकतमं बद्धा] K; एषा --- [4] ---ध्वा N; एषा एक ⊔बध्वा W **4:17** पूर्वाचार्यान्नमस्कृत्वा] N; पूर्वाचार्यान्नमस्कृत्य K; पूर्वाचायोन्नमस्कृत्वा W

मूर्ध्नि चित्तं समालम्ब्य ऊर्द्धङ्कृत्वा तु चक्षुषी॥ 4:17॥

एवमभ्यसमानस्तु तुर्यद्वारं विभिद्यते।
प्रत्ययज्ञायते तत्र वायुस्पर्शसमोपमः॥ 4:18॥

पीपिलिकासमो वापि कण्टका ((वेध)) ≪स≫ [5][[((प्र))]] भः।
अग्निर्ज्वलति देहे तु अधूमो दहनात्मकः॥ 4:19॥

दिव्यगन्धश्च जायेत दिव्यवाणी प्रवर्त्तते।
अपूर्वशास्त्रं यत्किञ्चिच्चिन्तितं तु विजानते॥ 4:20॥

तेजस्वी कान्तियुक्तश्च ऊर्ध्वगामी तु सञ्चरेत्।
सिद्धैश्च सह सम्भाष्यं त्रिभिर्म्मासैः प्रजायते॥ 4:21॥

आ ब्रह्मस्तम्बपर्यन्तं पश्यते दिव्यचक्षु [[((षा))]]।
[6] [[संव]]त्सरेणार्धचन्द्रं पश्यते च शिरोपरि॥ 4:22॥

ततोपरि शिवं शान्तन्तन्दृष्ट्वा चामृतीभवेत्।
सर्वज्ञः कामरूपी च शिवतुल्यश्च जायते॥ 4:23॥

एष ते ध्यानसद्भावं षडङ्गध्यानवर्जितम्।
निरालम्बेति विख्यातं यं ज्ञात्वा न तु शोचते॥ 4:24॥

किम्पुनर्ध्यानयुक्तात्मा असिद्धो ऽपि [[शिवो भवेत्]]।
[f. 37^{v}] ≪संसा≫रे क्रीडते चैव यथैव परमेश्वरः॥ 4:25॥

देव्युवाच।
शक्तेरपि वदेद्रूपं योगञ्चैव महेश्वर।
तत्त्वसद्भावमखिलं सुखबोध्यमविस्तरम्॥ 4:26॥

एतत्सर्वं समासेन कथयस्व प्रसादतः।
ईश्वर उ।

4:18 प्रत्ययज्ञायते] NW; प्रत्यक्षं जायते K **4:19** °वेध] W; --- N; वै K **4:19** अधूमो] K; अधूमा° NW **4:20** चिन्तितं तु] *conj.*; चिन्तित्तस्तु N; चिन्तितस्तु KW **4:21** त्रिभिर्] K; तृभिर् NW **4:22** ब्रह्मस्तम्ब°] *em.*; ब्रम्ह्मस्तम्भ° N; ब्रह्मस्तम्भ° KW **4:23** तन्दृष्ट्वा] N; तद्दृष्ट्वा KW **4:24** यं ज्ञात्वा] NW; यज्ज्ञात्वा K **4:25** रे] NW; व K **4:26** °वमखिलं] NW; °वमखिल° K

[[((शृणु देवि))]] --- ।
≪द≫[2]र्शनान्मोचयेज्जन्तुं रूपं शक्तेश्चतुर्व्विधम्॥ 4:27॥

अदृष्ट्वा शक्तिलक्षन्तु न भवेत्पाशहा गुरुः।
दृष्ट्वा चैव महालक्षं शक्तिबीजेन साधकः॥ 4:28॥

स गुरुश्शिवतुल्यश्च दृष्ट्वा मोचयते जगत्।
अन्यथा साधकास्सर्व्वे न मुच्यन्ते न मोक्षकाः॥ 4:29॥

ध्यायते यस्तु युक्तात्मा वत्सरार्धा सुय≪न्त्रितः≫।
≪सिद्धिस्तु मानुषे≫[3] लोके शिवतुल्यश्च जायते॥ 4:30॥

सुस्नातस्तु शुचिर्भूत्वा पूजयित्वा महेश्वरम्।
पूर्वसिद्धान्नमस्कृत्वा युक्तो ध्यानपरायणः॥ 4:31॥

निश्चाकभूप्रदेशे तु गुरुभक्तस्समाहितः।
श्रद्धामालंब्य यत्नेन आसन्नस्तु यथासुखम्॥ 4:32॥

वियं वीक्ष्य निमील्याक्षो भास्करोदयसन्निभम्।
पश्((यते च महातेजं श))[4]क्तिप्रह्वेन भासते॥ 4:33॥

पीतरक्ता तथा कृष्णा स्फटिकाभा मनोरमा।
द्रष्टव्या तु पराशक्तिस्ताम्दृष्ट्वा तु शिवं व्रजेत्॥ 4:34॥

---

33 Cf. *Svacchandatantra* 12:158–160: बिन्दुध्यानं समाख्यातं शक्तिलक्षं निबोध मे।
खं वीक्ष्य मीलिताक्षो यदुद्यद्भास्करसन्निभम्॥ 158॥
ईक्षते च महत्तेजः शक्तिः प्रभ्वीति सा स्मृता।
पीता रक्ता तथा कृष्णा स्फटिकाभा मनोरमा॥ 159॥
द्रष्टव्या परमा शक्तिः तां दृष्ट्वा शिवतां व्रजेत्।
व्यापिनीं च ततश्चोर्ध्वे पञ्चरूपां विचिन्तयेत्॥ 160॥

4:30 ध्यायते] *conj.*; ⊻⊻ते N; ⊔यते KW **4:30** सिद्धिस्तु मानुषे] *conj.* (cf. 3.67 etc.); --- N; सिद्धिं ⊔ K; सिद्धिम्त ⊔ W **4:32** निश्चाक°] N; निर्लोक° K; निश्लोक° W **4:32** °सन्नस्तु] K; °सन्नन्तु N; °सन्न तु W **4:33** वियं] NW; वियद् K **4:33** निमील्याक्षो] NW; निमीलाक्षो K **4:33** पश्यते च महातेजं स] W; पश् --- N; पश्यते च महा ⊔ K **4:33** शक्तिप्रह्वेन] *em.*; --- प्रह्वेन N; क्तिप्रयुक्तेन K; सतिप्रह्वेन W **4:34** पीतरक्ता] NW; पीता रक्ता K **4:34** स्फटिकाभा] KW; स्फटिकांभा N

अभ्यासान्मासमात्रेण सिद्धिलिङ्गा भवन्ति हि।
मेधा कान्तिस्तथारोग्यं सकृदुक्तञ्च गृह्णते॥ 4:35॥

देवदानवगन्धर्वा द्विमासेन तु दृश्यते।
दिव्यादिव्यं तु यत्किंचिद्विजयं सम्प्रवर्तते॥ 4:36॥

अणिमाद्या भवेत्सिद्धिः षण्मासाभ्यन्तरेण तु।
सिद्धस्सर्वज्ञतामेति शिवतुल्यश्च जायते॥ 4:37॥

त्रैलोक्ये यः प्रवर्त्तेत प्रत्यक्षन्तस्य जायते।
योजकस्तु परे तत्त्वे शक्त्येवं विन्दते तु यः॥ 4:38॥

ये न पश्यन्ति लक्षस्था दीक्षाकारी न मोक्षदा।
तान् ((दृष्ट्वा देशिकेन्द्रस्तु)) [6] लोकानुग्रहकारकः। ॥ 4:39॥

चक्षुषा वाचया स्पर्शा मनसा-द्-उदकेन वा।
दीक्षयेत्सर्वजन्तूनि शिवशक्त्योपबृंहितः॥ 4:40॥

संसारतारको ऽसौ हि स च पूज्यो यथा ह्यहम्।
साधकान्ये समाख्यातास्संहितापारगा [[श्च ये]] ॥ 4:41॥

[[(न) ((ते))]] मोचयि [[तुं शक्ताः]] ((शक्तिज्ञानवि)) ≪वर्जिताः≫।
--- [f. 38^{r}] ≍ व सदाशिवम्॥ 4:42॥

शक्तिसमरसञ्चैव योगसिद्धिमपेक्षते।
एष ते ज्ञानसद्भावं सुखबोध्यमविस्तरम्॥ 4:43॥

जन्तूननुग्रहार्थाय दातव्यं शिवभक्तिने।
शिवाद्गुरुतरी भक्तिर्यस्य नित्यं गुरोस्सदा॥ 4:44॥

4:36 दिव्यादिव्यं तु यत्किंचिद्विजयं सम्प्रवर्तते] *conj.*; दिव्यादिव्य --- [5] --- म्प्र?वर्त्तते N; दिव्यादिव्यं तु यत्किंचि ⊔स्य प्रवर्त्तते K; दिव्यादिव्यन्तु यत्किंचिद्वा जयं सम्प्रवर्त्तते W **4:37** सिद्धस्सर्वज्ञतामेति] KW; सिद्धस्सर्वज्ञतामेति N **4:38** त्रैलोक्ये यः] NW; त्रैलोक्ये K **4:38** शक्त्येवं] NW; शक्त्यैवं K **4:38** तु] NW; च K **4:39** दृष्ट्वा देशिकेन्द्रस्तु] W; दष् --- N; दृष्ट्वा दैशिके ⊔ K **4:41** °श्च ये] K; --- N; °पि ये W **4:42** मोचयितुं शक्ताः शक्तिज्ञानविवर्जिताः] *conj.*; मोचयि --- N; मोचयितुं शक्ताः K; मोचयितुं शक्ताः शक्तिज्ञानवि W **4:42** व सदाशिवम्] NW; ⊔ सदाशिवम् K

तस्य देयमिदञ्ज्ञानं द्वादशाब्दनिवासिने।
---॥ 4:45॥

≪अहिंसके≫[2] दयायुक्ते गुरुवाक्यमलंघके॥ 4:46॥

संसारभयवित्रस्ते धर्म्मज्ञे प्रियवादिने।
जपलिङ्गार्च्चनिष्ठाय दातव्यन्तु जितेन्द्रिये॥ 4:47॥

शिववद्यो गुरुम्मन्येद्भक्तिप्रह्वेण चेतसा।
तस्य देयमिदं शास्त्रमन्यथा न कदाचन॥ 4:48॥

देव्युवाच।
शिवश(([[क्तिसमुद्भूतं जगत्त्सर्वं चराचरम्।
स चैकाद]]श))≪पर्य≫[3]न्तं श्रुतं विस्तरशो मया॥ 4:49॥

अक्षरास्तत्त्वलक्षाश्च दीक्षाप्रक्रियभेदनम्।
ध्यानं चैव पृथक्त्केन समरसञ्चैव वर्णितम्॥ 4:50॥

एकत्वे सर्वतत्त्वानि उपास्यन्ते यथा हर।
एकत्वे दर्शनञ्चैव प्रसादात्प्रब्रवीहि मे॥ 4:51॥

ईश्वर उवाच।
नाभिवच्च शिवो ज्ञेयः श(([[क्तिर्मध्ये प्रतिष्ठिता।
अरध+:+ सर्वतत्त्वानि प्रत्यर]]:)) --- [4] कानि च॥ 4:52॥

शिवचक्रन्तदा ध्यानात्सर्वतत्त्वसमन्वितम्।
दर्शनञ्च यथा तस्य निमिषार्द्धेन मे शृणु॥ 4:53॥

खगस्याभिमुखो भूत्वा प्रेक्षकान्तन्निरीक्षयेत्।
पश्यते बिन्दुमालान्तु नानारेखाविचित्रितम्॥ 4:54॥

4:45 °वासिने] K; °वासिन --- N; °वासिनः W **4:46** गुरुवाक्यमलंघके] W; गुरुवाक्यंमलङ्घके N; गुरुवाक्यमलंघाके K **4:48** °प्रह्वेण] *em.*; °प्रह्वेन NW; °युक्तेन K **4:48** कदाचन] K; कदाचनः NW **4:49** स चैकादशपर्यन्तं] *conj.*; ---न्तं N; सा चाइकाद ⊔ K; सा चाइकादश ⊔ न्तं W **4:49** श्रुतं विस्तरशो] NW; ⊔श्रुतं विस्तरतो K **4:50** अक्षरास्] K; अक्षरा NW **4:50** पृथक्त्केन] N; पृथक् तेन KW **4:51** हर] *conj.*; हरः NKW **4:52** उवाच] K; उ N **4:52** नाभिवच्च] NW; नाभिबद्धः K

अव्यक्ता कृष्णरेखा तु जन्तुरेखा सिता भवेत्।
[[पीता नियतिरेखा तु धूम्रा कालात्मिका स्मृता]] ॥ 4:55॥

≪ग्र≫[5]न्थिरेखा भवेन्नीला विद्या वै रक्तरेखिणी।
ऐश्वरी चित्ररेखा तु बिन्दुरेखा तु स्फाटिकी॥ 4:56॥

चतुष्कला बिन्दुमाला सुषुम्णा पदिके स्थिता।
नादः प्रत्यरवज्ज्ञेयः शक्ति पद्मे विराजते॥ 4:57॥

जलबुद्बुदवद्देवं शक्तिमध्ये प्रतिष्ठितम्।
तन्दृष्ट्वा मुच्यते (((जन्तुः संसारभयबन्धनात्॥ 4:58॥

दृष्ट्वा चक्रं भवेत्त]]त्वी स)) ≪गु≫[6]रुर्ब्रह्मवेदिनः।
स चानुग्रहकर्त्ता च शिवतुल्यश्च जायते॥ 4:59॥

चक्षुषा वाचया स्पर्शा कर्म्मणा मनसा जपा।
धारणाध्यानयोगेन करोत्यनुग्रहेच्छया॥ 4:60॥

तस्य पादरजन्देवि ब्रह्महा यदि धा[[((रयेत्।
तत्क्षणादेव))]] --- ॥ 4:61॥

≪ततो ऽने≫[f.38^{v}]नैव देहेन सिद्धिं कुर्वन्ति चेप्सिताम्।
सृजेत्संहरते विश्वं क्रीडते क्रमतेति च॥ 4:62॥

नानारूपधरो भूत्वा इच्छया कुरुते क्रियाम्।
सर्वज्ञभावमापन्नः शिवतु≪ल्यश्च जायते ≫॥ 4:63॥

--- [2] --- विन्दते।

---

61 Cf. *Tantrasadbhāva* 9:352c–353b: तस्य पादरजो देवि शिरसा धारयेद् यदि। तत्क्षणादेव मुच्येत सर्पस्य कवचं यथा।

4:56 °न्थिरेखा] N?; °स्थिरेखा K; °स्थिरेखो W **4:56** रक्तरेखिणी] *em.*; रक्तरेखिनी NKW **4:57** ज्ञेयः] K; ज्ञेय NW **4:58** मुच्यते] KW; मच्य ≍ N **4:60** स्पर्शा] NW; स्पर्शात् K **4:60** जपा] NW; जपात् K **4:60** करोत्य°] K; करोत्या° NW **4:61** धारयेत्] WK; धा --- N **4:62** नैव] N; देव K; नैव W **4:63** सर्वज्ञभावमापन्नः] N; सर्वज्ञो भावमापन्न K; सर्वज्ञ ⊔ W **4:64** विन्दते] N; ⊔ KW

जिज्ञासुरपि योगस्य कलान्नार्हन्ति षोडशीम्॥ 4:64॥

एकाह्नमपि योगन्तु अभ्यसेत्कलुषात्मकः।
तत्क्षणात्स तु शुद्धो हि महानिद्रा विमुच्यते॥ 4:65॥

एष योगो मया प्रोक्त अक्लेशात्सिद्धिमोक्षदः।
कथं द्वादशभिर्वर्षैस्त्रिभिः शुद्धेन --- ॥ 4:66॥

[[ज्ञानं ते संप्रवक्ष्यामि शृणु]] --- ।
[3] --- चान्ततो भवेत्॥ 4:67॥

स्थावरञ्जंगमं चैव अण्डजं स्वेदजन्तथा।
स्थूलं सूक्ष्मञ्च यच्चान्य द्रेश्याद्रेश्यञ्च यत्स्थितम्॥ 4:68॥

आब्रह्मस्तम्बपर्यन्तं यच्च किंचिद्भवस्थितम्।
तत्सर्वम्परमेशो हि विश्वरूपेण संस्थितम्॥ 4:69॥

≪व्यापयित्वा≫ [[((जगत्सर्वं स्थितो व्यो))]] ≪मेषु व्योमवत्≫।
[4] एवं सर्वगतो देवः शिवः परमकारणः॥ 4:70॥

चेतो ऽप्येवं स्थितो नित्यं जगद्व्यापी चराचरम्।
एवं शिवन्तथात्मानमेकीभूतं विचिन्तयेत्॥ 4:71॥

एवं हि सर्वभूतानि आत्मानञ्च तथैव हि।

---

70 Cf. *Svacchandatantra* 11:35c–36b: एवं सर्वगतो देवि शिवः परमकारणः। व्याप्य देवि जगत्सर्वं व्योमसु व्योमवत्स्थितः। and cf. the corresponding verse in the *Tantrasadbhāva* (also 11:35c–36b): एवं सर्वगतो देवि शिवः परमकारणः। व्यापयित्वा जगत्सर्वं स्थितं व्योमेषु व्योमवत्।

4:64 जिज्ञासुरपि योगस्य] N; ⊔रपि योगस्य K; ⊔ W **4:65** एकाह्नमपि] NW; एकाहनपि K **4:66** प्रोक्त अक्लेशात्] K; प्रोक्त अक्लेषात् NW **4:66** कथं] NW; ⊔ K **4:66** त्रिभिः शुद्धेन] *em.*; तृभि शुद्धे N; तृभिस्तु K; तृभि शुद्धेन W **4:67** चान्ततो भवेत्] N; ⊔ ततो भवेत् K; ताम्ब्रजेत् W **4:68** जंगमं चैव] K; जगमञ् N; जंगम W **4:68** यच्चान्य द्रेश्याद्रेश्यञ्] N; यच्चान्यद्दृश्यादृश्यं K; यच्चान्य द्रेस्यादृस्यं W **4:69** °स्तम्ब°] *em.*; °स्तम्भ° NKW **4:69** किंचिद्] K; किञ्चि NW **4:70** व्यापयित्वा जगत्सर्वं स्थितो व्योममेषु व्योमवत्] *conj. Kafle*; --- N; ⊔ जगत्सर्वं स्थितो व्योम ⊔ KW **4:70** एवं सर्वगतो देवः शिवः] *conj.*: --- देवः शिवः N; ⊔ KW

शिववन्मन्यमानो हि रागद्वेषविवर्जितः॥ 4:72॥

भवन्ति निर्मलाः शुद्धाः शिवभाव [[((समन्विताः))]] ।
((([[समरस]]न्तु विज्ञेय शिवेन सह)) --- ॥ 4:73॥

[5] [[((शिव))]]वत्सर्वविश्वन्तु दृश्यमानञ्चराचरम् ।
समं शत्रुं समम्मित्रं ब्राह्मणः श्वपचस्समौ॥ 4:74॥

तुल्यदर्शी भवेत्सिद्धो ज्ञात्वा सर्वं शिवात्मकम् ।
निश्चयी एकचित्तस्तु शिवभावसमन्वितः॥ 4:75॥

शत्रवो दंष्ट्रिणो व्याघ्रा रिक्षाः सिंहाश्च वानराः ।
क्रूरम --- [[पिशिता हिंस्रका]] --- ॥ 4:76॥

---[6] ((मे))कं विचिन्तयेत् ।
एवं चिन्तयतस्तस्य न ते हिंसन्ति हिंसकाः॥ 4:77॥

समया सम तिष्ठन्ते दुष्टसत्त्वाश्च राक्षसाः ।
सिद्धाश्चैव तथा देवा वशमायान्ति भृत्यवत्॥ 4:78॥

तुल्यदर्शी विशुद्धात्मा शिवतुल्यश्च जायते ।
क्रीडते दि --- [f. 39^r] ।
---((स्य कवचं यथा॥ 4:79॥

[[ध्यायते य]]))स्तु युक्तात्मा मासमेकं सुयन्त्रितः ।
प्राकृता जायते सिद्धिर्द्विमासेन तु पौरुषी॥ 4:80॥

नियतिकालसिद्धिश्च मायजा विद्यजा तथा ।
ऐश्वरी बिन्दुसिद्धिश्च कलजा शक्तिजा तथा॥ 4:81॥

प्रतिमा((([[सेन सिद्धन्ते]] अष्टा)) --- ।

4:72 °विवर्जितः] NW; °समन्वितः K **4:74** °विश्वन्तु] NK; °विश्वस्तु W **4:74** दृश्यमानञ्चराचरम्] *conj. Kafle*; ≃ श्य(?)मानञ्चराचरम् N; ⊔ चराचरम् KW **4:74** समौ] NW; समः K **4:75** सर्वं] N; सर्व KW **4:76** रिक्षाः] K; रिक्षा NW **4:76** क्रूरम ---पिशिता हिंस्रका] *em.*; क्रूरम --- N; क्रूर ⊔ पिसिता हिंस्रका K; क्रूर ⊔ पिसिता हिन्सका W **4:77** मेकं विचिन्तयेत्] W; --- कं विचिन्तयेत् N; --- K **4:78** समया°] NK; समयो W

((सर्वज्ञः)) [2] सर्वगः शुद्धः स्वतन्त्रः कामरूपवान्।
न चेच्छा हन्यते तस्य शिवस्वच्छन्दताम्व्रजेत्॥ 4:82॥

स्थूलात्स्थूलतरो भूत्वा सूक्ष्मात्सूक्ष्मतरः परः।
सतनुर्वितनुश्चैव इच्छया कुरुते तनुम्॥ 4:83॥

एष ते ज्ञानसद्भावमतिगुह्यम्प्रकीर्त्तितम्।
त्व((([[या गुप्ततरं कार्य]]ममृतं न प्रकाशयेत्))॥ 4:84॥
--- [3] ((द्वाद))शभिस्समैः।
अन्यथा दुष्टमर्त्यानां न देयममृतामृतम्॥ 4:85॥

हव्यकव्यप्रदा मर्त्या देवानान्तु कुटुम्बिनः।
तत्त्ववेत्ता शिवं याति देवानां हीयते हविः॥ 4:86॥

दशाद्ऊर्ध्वं यदि ब्रूयाल्लोभाद्दर्प्पेण वा पुनः।
शिरच्छेदन्तु वज्रेण क्रुद्धः कुर्याच्छतक्रतुः॥ 4:87॥

एतस्मात्कारणा((([[द्देवि]] नाख्यातव्यं हि)) --- [4]
≪शि≫((व))शक्तिसमाकृष्टे दातव्यं सुपरीक्षिते॥ 4:88॥

देव्युवाच।
वेदादौ सर्वशास्त्रे च प्रणवं किल मोक्षदम्।
स कथम्मोक्षदो देव प्रसादाद्वक्तुमर्हसि॥ 4:89॥

ईश्वर उ।
अर्द्धषोडशमात्रस्तु देवाष्टकसमन्वितः।
द्वात्रिंशत्तत्त्वसंयुक्तं ध्यातो निष्कल मोक्षदः॥ 4:90॥

देव्युवाच।
अर्द्धषोडशमात्र[[((स्तु देवाष्टकसमन्वितः।
द्वा))]][5]त्रिंशत्तत्त्वसंयुक्तः कथं ध्येयो हि निष्कलः॥ 4:91॥

4:84 एष ते] NW; एतत्ते K **4:84** कार्यममृतं] W; --- N; का(र्यम्) ⊔ K **4:86** शिरच्छेदन्तु वज्रेण] *conj.*; शिरच्छेदन्तु वक्रेण N; शिरच्छेदस्तु चक्रेण K; शिरःछेदन्तु वज्रेण W **4:89** °षोडश°] K; °षोडष° NW **4:90** निष्कलः] NW; मोक्षदः K

ईश्वर उ।
आदिपञ्चस्वरादौ तु पञ्चविंशस्तु योनजः।
बिन्दुषण्नादशक्तिश्च पञ्चवर्ण्णत्रिभिन्नकाः॥ 4:92॥

ब्रह्मा विष्णुश्च रुद्रश्च अर्धचन्द्री सनाद च।
शक्तिश्च सप्तमी ज्ञेया शिवश्चैव तथाष्टमः॥ 4:93॥

भूतानि आदिबीजस्तु दीर्घा मोक्षेषु कीर्ति[[ताः]]।
((त्रिमात्रं सम)) ---[6][[प्रो]]क्तं तन्मात्रेषु च उ स्मृतः॥ 4:94॥

अहंकारे च बुद्धौ च अव्यक्तादितृकेषु च।
दीर्घश्चैव समाख्यातः स्रुतः पुरुष उच्यते॥ 4:95॥

नियति पञ्चविंशस्तु दीर्घ कालश्च पठ्यते।
त्रिमात्रस्तु भवेन्माया संसारपरिवर्त्तिनी॥ 4:96॥

बिन्दु सदाशिवं देवमस्य नाद महेश्वरम्।
[f.39^{v}] ((दे))वी च रश्मयः प्रोक्ता विद्या चैव निगद्यते॥ 4:97॥

द्वात्रिंशकः शिवो ज्ञेयो निष्कलः परमेश्वरः।
यं ध्यात्वा मोक्षमायान्ति शिवतुल्या भवन्ति च॥ 4:98॥

देव्[[((युवाच।
योगस्तु बहुधा ख्यातो लक्षालक्षं महेश्वर।
योगस))]]द्भावमाख्याहि अत्र मे संशयो महान्॥ 4:99॥

[2] नाडीसंशोधनञ्चैव वायूनाञ्च जयं कथम्।

---

99 This passage, from 4:100–144b, has been adapted to create *Svacchandatantra* 7:285c–330, for which see Appendix III.

4:91 उ] NW; उवाच K **4:92** ब्रह्मा] K; ब्रह्म NW **4:92** सनाद च] NW; सनादवत् K **4:93** प्रोक्तं] K; ---क्तं N; त्युक्तं W **4:93** उ] NK^{ac}W; उ+ः+ K **4:95** नियति] NW; नियतिः K **4:96** बिन्दु] NW; बिन्दुं K **4:96** नाद] NW; नादं K **4:96** प्रोक्ता] NW; प्रोक्तो K **4:97** द्वात्रिंशकः] KW; द्वातृंशकः N **4:98** महेश्वर] *conj.*; महेश्वरः NKW **4:98** अत्र मे संशयो महान्] NW; ⊔ K **4:99** संशोधन°] NW; संरोधन° K **4:99** जयं] K; जय NW

स्थानं रूपञ्च कर्म्मञ्च शब्दं प्रब्रूहि शंकर॥ 4:100॥

ईश्वर उवाच।
परमं योगसद्भावङ्गुह्याद्गुह्यतरम्परम्।
यन्न कस्यचिदाख्यातन्तद्योगं शृणु तत्त्वतः॥ 4:101॥

सुप्रशस्ते भूप्रदेशे नाग्न्युदकसमीपतः।
वालुकाशर्ङ्करहीने शुष्कवृक्षविवर्जिते॥ 4:102॥

नि((सर्प्प))≪कीट≫[3]वल्मीके ईतिभिः परिवर्जिते।
पुण्यधर्म्मिष्ठसंवासे तत्र योगं समभ्यसेत्॥ 4:103॥

देवदेवं समभ्यर्च्य विघ्नेशञ्च पुनः पुनः।
पूर्वाचार्यान्नमस्कृत्वा युक्तो ध्यानपरायणः॥ 4:104॥

आसनम्पद्मकं बद्धा स्वस्तिकम्भद्रचन्द्रकम्।
सापाश्रयं योगपट्टमासीनञ्च यथासुखम्॥ 4:105॥

तालुजिह्वादन्तास्पर्शी समको [4] नासदृष्टिगः।
सत्यवागर(?)हिसञ्च नित्ययुक्तश्च सिद्धति॥ 4:106॥

शिखाङ्कुरस्तु निर्दग्धन्देहङ्कृत्वा शिवात्मकम्।
दशधा योगमार्गेण अभ्यसेत्परमेश्वरम्॥ 4:107॥

मन्त्र बिन्दु अतीतञ्च नादात्मा ज्योति विग्रहम्।
कल्पनालक्षमकलं ध्यात्वाद्वैतेन सर्वगम्॥ 4:108॥

प्रकृत्यादौ शिवान्तञ्च योग[[: ((ख्यातो महांस्त))]]≪व≫।
[5] ((द[[श]]))धा च पुनः ख्यातो ध्यायेत्प्राणस्य संयमात्॥ 4:109॥

4:100 उवाच] K; उ NW **4:100** गुह्याद्गुह्य°] K; गुह्यागुह्य° NW **4:101** सुप्रशस्ते] *conj.*; सुप्रशस्त° NKW (unmetrical) **4:101** शुष्कवृक्षविवर्जिते] NW; ⊔ K **4:102** निसर्प्पकीट°] *conj.*; नि--- N; नि ⊔ K; निसर्प्पक ⊔ W **4:103** पूर्वाचार्यान्नमस्कृत्वा] NW; पूर्वाचार्य्यं नमस्कृत्य W **4:104** सापाश्रयं] NW; मायाश्रयं K **4:105** °जिह्वादन्तास्पर्शी] N; ⊔ K; °जिह्वादन्तास्पर्सी W **4:105** समको] *conj. Kafle*; --- NK; समका W **4:105** सत्यवागरहिसञ्च] N; सत्यवाक् ⊔श्च K; सत्ववा ⊔हि ⊔श्च W **4:106** शिखाङ्कुरस्तु] *conj.*; शिखाङ्कारस्तु NW; शिखाकारस्तु K

अवसव्येन पूरेत सव्येनैव तु रेचयेत्।
नाडीसंशोधनं ह्येतन्मोक्षमार्गपथस्य तु॥ 4:110॥

रेचनात्पूरणाद्रोधात्प्राणायामास्त्रयः स्मृताः।
सामान्याद्बहिरेतानि पुनश्चाभ्यन्तराणि च॥ 4:111॥

अभ्यन्तरेण रेचेत पूरेच्चाभ्य[[((न्तरेण तु))]]।
((नि≪ष्कम्पं कुम्भकं≫[6] कुर्यात्त्रयश्चा))भ्यन्तराणि तु॥ 4:112॥

नाभ्यां हृदयसंचारान्मनश्चेन्द्रियगोचरात्।
प्राणायामश्चतुर्थस्तु सुप्रशान्तस्तु विश्रुतः॥ 4:113॥

प्राणरोधे तु सम्पूर्णे नाभिन्नीत्वा समुच्छ्वसेत्।
शनैर्विमुञ्चयेद्वायुं वामनासिकया पुटे॥ 4:114॥

वायवीन्धार((ये ≪ऽङ्गु≫ष्ठे आग्नेयीं नाभिमध्यतः))।
≪माहेन्द्रीं कण्ठदेशे तु वारुणीं [f.40^r] घ≫ण्टिकेषु च॥ 4:115॥

आकाशधारणा मूर्ध्नि सर्वसिद्धिकरी स्मृता।
एकद्वित्रिश्चतुःपञ्च उद्घातैश्च प्रसिद्ध्यति॥ 4:116॥

संरुद्धे चैव प्राणे तु मूर्ध्निङ्गत्वा निवर्त्तते।
तदुद्घातमिति प्रोक्तञ्ज्ञातव्यं योगिभिस्सदा॥ 4:117॥

राग≪द्वेषौ≫प्रक्षीयेते प्राणायामैश्च धा((रितैः))।
धारणैस्सर्वपापानि ((प्रत्याहारे ऽक्षसंयमः))॥ 4:118॥

4:109 अवसव्येन] NW; अपसव्येन K **4:109** पूरेत] NW; पूर्येत K **4:110** °मास्त्रयः स्मृताः] *conj.*; °मस्त्रयः स्मृतः NW; °मस्तु यः स्मृतःK **4:112** हृदय°] KW; हृदयं N **4:113** पुटे] NW; पुटा K **4:114** वायवीन्धार°] W; वायवींन्धा ⌣ N; वायवीं द्वार K **4:114** आग्नेयीं] *conj.*; आग्नेयी NKW **4:114** ण्टिकेषु] N; ण्डिकेयु K; ण्डकेप्र W **4:115** धारणा] NW; धारणान् K **4:115** सर्वसिद्धि°] K; सर्वसद्धि° N; सर्वसञ्चिकरी W **4:115** एकद्वित्रिश्चतुःपञ्च] *em.*; एकद्वितृश्चतुःपञ्च N; एकद्वित्रिचतुर्थं च K; एकद्वित्रिस्चतुःपंच W **4:115** °द्घातैश्च] N; °घातैश्च K; °त्घातैश्च W **4:116** मूर्ध्निङ्गत्वा] NW; मूर्ध्नि गत्वा K **4:117** प्रक्षीयेते प्राणायामैश्च धारितैः] W; प्रक्षीय ⌣ प्राणाया --- च धा ि --- N; ⊔ K **4:117** धारणैस्सर्वपापानि] W; धारणेस्सव ⌣ ⌣ N; ⊔ K

≪हृद्गुदे ना[2]भि≫कण्ठौ च सर्वसन्धौ तथैव च।
प्राणाद्यास्संस्थिता ह्येते रूपं शब्दञ्च मे शृणु॥ 4:119॥

द्युततारनिभः पीत इन्द्रगोपकसन्निभः।
क्षीराभ स्फटिकाभश्च पञ्चानां रूपलक्षणम्॥ 4:120॥

घण्टाकांसश्च मधुरो गजनादो बहुध्वनिः।
प्राणादीनान्तु पञ्चानां शब्दमेतदुदाहृतम्॥ 4:121॥

जल्पितं हसितं ((([[गीतं नृत्यं]] युद्धगतिः)) [3] ≪कलाः≫।
शिल्पञ्च सर्वकर्म्माणि प्राणस्यैव हि चेष्टितम्॥ 4:122॥

प्रवेशये ऽन्नपानानि नृमलं स्रावयेदधः।
अन्धत्वं श्रोत्ररोगं च अपानस्तु करिष्यति॥ 4:123॥

अशितं लीढपीतं च समानः समतान्नयेत्।
क्षुतहिक्काच्छर्द्दिकास उदानस्य विचेष्टितम्॥ 4:124॥

रोमहर्षञ्च स्वेदञ्च शूलदो ह्यङ्गभञ्जकः।
व्यानस्यै ((([[तानि]]कर्माणि)) ≪स्पर्श≫[4]त्वञ्चैव विन्दति॥ 4:125॥

अङ्गुष्ठजानुहृदये लोचने मूर्ध्नि संस्थितः।
नागाद्या बहुरूपाश्च कर्म तेषान्निबोध मे॥ 4:126॥

आह्लादनोद्वेजनश्च शोषणस्त्रासकस्तथा।

4:118 हृद्गुदे नाभिकण्ठौ] *conj.*; ---कण्ठौ N; ⊔कण्ठौ K; कृ ⊔ कण्ठौ W **4:118** °सन्धौ] NW; °सतौ K **4:119** °भः पीत इन्द्रगोपकसन्निभः] NW; °भं इन्द्रगोपकसन्निभम् K **4:119** क्षीराभ स्फटिकाभश्च] NW; क्षीराभं स्फटिकाभं च K **4:121** युद्धगतिः कला] *conj.*; --- N; य ⊔ K; युद्धतिं ⊔ W **4:121** प्राणस्यैव] W; ⊔णस्यैव N; ⊔स्यैव K **4:122** नृमलं] K; नृमल NW **4:122** अन्धत्वं श्रोत्ररोगं च अपानस्तु] *conj.*; अन्धत्वश्रोत्ररोगश्च अपान्नस्तु N; अत्यर्थश्रोत्ररोतं च अपात्रं च K; अत्वत्वश्रोत्ररोगश्च अपान्नस्तु W **4:123** अशितं लीढपीतं] *conj.*; अशितं लीटपीतञ् N; असितं लीढपीतं KW **4:123** समानः] KW; समानम् N **4:123** क्षुतहि°] *em.*; क्षुतं हि K; क्षुतदि° NW **4:123** स] NW; °सं K **4:124** ह्यङ्गभञ्जकः] K; ह्यङ्गंजकः N (unmetrical); ह्यङ्भंजकः W (unmetrical) **4:124** °वञ्] N; ⊔ KW **4:125** अङ्गुष्ठ°] NW; अङ्गुष्ठे K **4:125** कर्म] K; कम्म NW **4:126** आह्लादनोद्वेजनश्च शोषणस्त्रा°] K; आह्लानोद्वेजनश्च शोषणत्रा° N; आह्लानोद्वेजेनश्च शोषणत्रा W

निद्रातन्द्रीकरश्चान्यो योजको हि धनञ्जयः॥ 4:127॥

श्वाससङ्कोचच्छेदे च घुरुघुरुस्योत्क्रमेति च (?)।
नागादीनान्तु पञ्चानाम्मृत्युकाले [[((विचेष्टितम्))]] ॥ 4:128॥

((न)) ≪चैव याति≫[5] चोत्क्रान्त्या कूर्मश्चैकस्[[तु]] तिष्ठति।
आकुञ्चयति वै कूर्मः शोधये च कलेवरम्॥ 4:129॥

प्राणमेव जयेत्पूर्वञ्जिते प्राणे जितम्मनः।
जिते मनसि शान्तात्मा परन्तत्त्वम्प्रकाशते॥ 4:130॥

प्राणापानौ तु देव्यायै प्राणसमानौ च नाभितः।
प्राणोदानञ्च कण्ठे च प्राण[[व्यानश्च स]]र्व≪गः≫॥ 4:131॥

≪नागाद्याः प्राणसंयुक्ताः स्वस्था[6]नेषु ≫निरुद्धयेत्।
निरुद्धस्य च यत्कालं प्रवक्ष्यामि निबोधत॥ 4:132॥

तालात्प्रभृति धार्येत यावत्पञ्चशतङ्गतः।
जितो ऽनिलो भवत्येवं सङ्क्रान्त्युत्क्रान्तिकर्म्मकृत्॥ 4:133॥

दिव्यकान्ति शुभो गन्धो प्रज्ञा चास्य विवर्द्धते।
दिव्यदृष्टिश्च श्रोत्रं च दिव्या वाचा प्रवर्[[तते]] ॥ 4:134॥

((वायुवद्)) [f. 40^{v}] विचरेल्लोकान् सिद्धान्देवांश्च पश्यति।
मनेच्छाचिन्तितप्राप्तिः प्रवर्त्तेत गुणाष्टकम्॥ 4:135॥

सर्वकामसुसम्पूर्णस्सर्वद्वन्द्वविवर्जितः।
संसारबन्धान्निर्म्मुक्तः शिवतुल्यश्च जायते॥ 4:136॥

4:127 °स्योत्क्रमेति] NW; °श्चोत्क्रमेति K **4:127** मृत्युकाले] NW; मृत्युकाल K **4:128** चोत्क्रान्त्या] W; ो त्क्रान्त्या N; ⊔ K **4:128** कूर्मः शोधये च कलेवरम्] *conj.*; कूर्म्मश्शाधये च कलेवरम् N; कूर्मं वाधयेच्च कलेवरम् K; कुर्म्मश्चाधये च कलवरम् W **4:130** देव्यायै] NW; देव्याये K **4:130** सर्व] K; ≍र्व N; ⊔ W **4:131** स्वस्थानेषु] *conj.*; --- N; ⊔ K; ⊔तेषु W **4:132** धार्येत] NW; धामेत K **4:133** शुभो गन्धो] NW; भोगं चा K **4:133** श्रोत्रं च] *em.*; श्रोतञ्च NW; स्रोतश्च K **4:134** विचरेल्लोकान्] *em.*; विचरेल्लोका N (but an anusvāra might have been cut off in the upper margin); विरचेल्लोका+न्+ K; विचरेल्लोकां W

प्राणापाने तु संयोज्य ह्रस्वकोटिसमन्वितम्।
नाभ्यान्धारेत योगी≪न्द्रः स्वेदकम्पश्च जायते≫॥ 4:137॥

≪पुनरेव हृदिस्थौ हि प्राणापानौ ≫[2] ((नि))रुद्धयेत्।
दीर्घकोटिसमायोगात्क्षणात्पतति मूर्च्छितः॥ 4:138॥

कण्ठस्थं हि तथैवेह प्राणमेकन्निरुन्धयेत्।
स्रुतकोटिसमायोगात्स्वप्ने वृत्तिस्ततो भवेत्॥ 4:139॥

भ्रूमध्ये बिन्दुयुक्तेन प्राणरोधन्तु कारयेत्।
सुषुप्तं जायते तत्र क्षणाच्चैव प्रबुध्यति॥ 4:140॥

मूर्ध्नि द्वारं समालम्ब्य निष्कलं ध्यानमारभेत्।
≪एवमभ्यस≫[3][[((त))]]स्तस्य प्रत्ययस्तु तदा भवेत्॥ 4:141॥

पिपीलकण्टकावेधो मूर्ध्नि द्वारं विभिद्यते।
जायते तन्मयत्वं हि देहेनानेन साधकः॥ 4:142॥

सङ्क्रमेत्परदेहेषु क्षुत्तृष्णाभ्यान्न बाध्यते।
अतीतानागतञ्चैव त्रैलोक्ये यत्प्रवर्त्तते॥ 4:143॥

प्रत्यक्षम्भवते तस्य सर्वज्ञत्वञ्च जायते।
देव्युवाच।
सूत्रन्नाम महादेव आलोक्यपद[[((वाचकम्))]]॥ 4:144॥

---

143 The parallel with the *Svacchandatantra* ends with 4:144b; the following passage (4:144c–158) has been incorporated into the *Jñānakāṇḍa* of the *Niśvāsakārikā* (37:10–24 in T.17), for which see Appendix IV.

4:137 °योगात्क्षणात्पतति] N; °योगा ⊔त्पतति K; °योगा ⊔तति W **4:137** (मूर्च्छितः)] K; ऊर् ल्क् ि तः N; मूर्त्तितः W **4:138** निरुन्धयेत्] N; निरुद्धयेत् KW **4:140** मूर्ध्नि द्वारं समालम्ब्य निष्कलं ध्यानमारभेत्] *conj.*; मूर्ध्नि द्वार ≍ ---ष्कल ध्यानमारभेत् N; मूर्ध्नि द्वारं समालंभ्य निष्कलं ध्यानमारभेत् K; मूर्ध्नि द्वा ⊔निष्कल ध्यानमाचरेत् W **4:141** पिपीलकण्टकावेधो] N; पिपीलकंजकावेधो K; पिपीलकण्ठकावेधौ W **4:141** मूर्ध्नि] NW; मूर्ध्नि K **4:141** हि] NW; च K **4:142** क्षुत्तृष्णाभ्यान्] NW; क्षुड्तृष्णाभ्यां K **4:142** बाध्यते] *conj.*; बोधते NKW

[4] [[त]]दहं श्रोतुमिच्छामि भगवन्वक्तुमर्हसि।
ईश्वर उवाच।
सूचनात्सूत्रमित्याह सूत्रन्नाम पदम्परम्॥ 4:145॥

तेन सर्वमिदं व्याप्तं सूत्रे मणिगणा इव।
अखण्डितन्तु तत्सूत्रं खम्व्यापि-म्-अजरं परम्॥ 4:146॥

तडिद्वलयसन्तानं खटिकेन प्रकाशयेत्।
हृत्पौण्डरीकमध्यस्थं सोमसूर्याग्निमध्यगम्॥ 4:147॥

यः प((([[श्ये(त्पर)]]))[5]मं सूक्ष्मं स लेख्यं कर्तुमर्हसि।
देव्युवाच।
तत्त्वा देवगणाः सर्वे सर्वन्यासे व्यवस्थिताः॥ 4:148॥

तेषां मन्त्रविभागो ऽयं कथयस्व प्रसादतः।
ईश्वर उ।
सर्वे मन्त्रात्मका देवास्सर्वे मन्त्राः शिवात्मकाः॥ 4:149॥

शिवात्मकैश्च मन्त्रैश्च शिवयागे तु पूजयेत्।
अप्राप्य शिवसद्भावम्पठतो (([[पि]] हि)) ≪संहि[6]ताम्≫॥ 4:150॥

अज्ञात्वा कुरुते दीक्षां शिष्याचार्यौ व्रजेत्यधः।
तस्मान्न समानपशुः शिष्यत्वेनोपतिष्ठते॥ 4:151॥

उभयतो ऽपि न शिवाशिवमेकपशोः परः।
अविदित्वामयं सम्यक्क्रियां यः कुरुते भृशं॥ 4:152॥

नातुरस्सुखमाप्नोति वैद्यो ऽपि न फ [f.41^{r}] [[(लं ल) भेत्]]।
ज्ञानविज्ञानकुशलस्सर्वावस्थगतो ऽपि यः॥ 4:153॥

4:144 उवाच] K; उ NW **4:144** सूचनात्] NW; सूचना K **4:145** व्यापि] NW; व्यापी K **4:148** मन्त्राः] K; मन्त्रा NW **4:149** पठतो] NK; पधतो W **4:150** व्रजेत्यधः] NW; व्रजत्यधः K **4:150** °पशुः] *conj.*; °पशोः NKW **4:150** शिष्यत्वेनोप°] NK; शिष्यश्च नोप° W **4:151** °मयं] NK^{ac}W; °श्रयं K^{pc} **4:152** फलं लभेत्] K; फ --- N; फ न लभेत् W **4:152** °कुशलस्सर्वावस्थ°] NK; °कुशलेस्सर्वावस्था° W

स मोचयति पाशेभ्यो ज्ञाननिर्धूतकिल्बिषः।
सर्वलक्षणहीनो ऽपि ज्ञानवान् गुरुरुच्यते॥ 4:154॥

दीक्षाविधिविधानज्ञो पाशजालविमोचकः।
शिवे शक्त्या महाशक्तिः शक्तिभावेन देशिकः॥ 4:155॥

उभयोरन्त[[रं]] नास्ति देशिकस्य शि[[((वस्य च))]]।
≪सचैवोङ्कार≫[2] [[((बिन्दु))]]श्च सनादो लयनिष्कलः॥ 4:156॥

तस्मिं सर्वाणि विद्यन्ते स चैव परमश्शिवः।
सर्वविद्यासुसम्पूर्ण्णस्सर्वविद्यार्थकोविदः॥ 4:157॥

आचार्यस्य च मन्त्रस्य शिवज्ञानशिवस्य च।
नानात्वं नैव कुर्वन्ति अनन्तेशादयः शिवाः॥ 4:158॥

जन्मान्तरैः कल्पसहस्रकोटिभिः
कथञ्चि लभ्येच्छिवतत्त्वमुत्त[[((मम्))]]।
--- [3] [[((र))]]ते चात्मविमोक्षहेतोर्
ददाति लोभाय कथम्परस्य तु॥ 4:159॥

नूनं हि सो नेच्छति मोक्षमात्मनो मोहेन लोभेन च यो हि वक्ष्यते।
अपायमुक्तो हि मया गुरूणान्न देय तत्त्वामृत यस्य कस्यचित्॥ 4:160॥

चत्वारि चैतानि शतान्यधीत्य
सषष्टियुक्तानि षडाधिकानि।
उद्धृत्य पञ्चाश कुला[[((नि यो)) (वै)]] [4]
शिवत्वमायाति स्वरूपतेजसा॥ 4:161॥

4:153 पाशेभ्यो] N; (पाशे)भ्यो K; मासेभ्यो W **4:153** °निर्धूत°] N^{pc}K; °वि-र्द्धूत° N^{ac}W **4:153** °हीनो] *conj.*; °क्षीनो NW; °क्षी(ही)नो K **4:153** ज्ञा-नवान् गुरुरुच्यते] KW; ज्ञानवान्तुरुरुच्यते N **4:154** °ज्ञो] N; °ज्ञः K; °ज्ञ W **4:154** देशिकः] N; दैशिकः K; देसिकः W **4:155** देशिकस्य] N; दैशिकस्य K; दे-सिकस्य W **4:157** शिवज्ञान°] NW; शिवज्ञाने K **4:157** कुर्वन्ति] NW; कुर्वीत K **4:158** कथञ्चि] *conj.*; कथञ्चिल् NKW (unmetrical) **4:158** लोभाय] NW; लाभाय K **4:159** च] N? K; ¯ W **4:159** देय तत्त्वामृत] NW; देयं तत्त्वामृतं K (unmetrical) **4:160** शतान्यधीत्य] NK; त्यधीत्य W (unmetrical) **4:160** षडाधिकानि] NK; षताधिकानि W

॥ ⊗॥ इति निश्वा≪स≫तत्त्वसंहितायां नयसूत्रे परमामृतसद्भावविचारश्चतुर्थः पटलः॥

श्लो 466 (?) ॥ ⊗॥ स्रोत्रे सूत्रत्रयं समाप्तम्॥

4:160 निश्वास॰] W; निश्वा॰ N; निःश्वास॰ K **4:160** 466] N? K; 465 W
4:160 स्रोत्रे] N; श्रौत॰ K; श्रोत्रे W